47. Some classical poets were not satisfied with the rhythm of *Samavrittas* even, which are at the best, but excellent forms of blank verse. They topped it over with various kinds of rhyme, which in Sanskrit goes by the name of *Yamaka*. There are some really good poems in it, such as नलोदयकाव्यं; घटकर्परकृतं यमककाव्यम्; अमरुशतके २४, ६९; भर्तृहरेः शृङ्गारशतके ३, ४, ११, नीतिशतके च ८, २१, २२, ३७; शङ्कराचार्य्यस्य मोहमुद्गरः and आनन्दलहर्य्यां ८८, ९२, ९३, १०१, १०३; धर्म्मदासकृते विदग्धमुखमण्डने प्रथमे परिच्छेदे ५, १०; जयदेवकृतौ गीतगोविन्दः; चौरपञ्चाशिका; भारतचन्द्रकृतं नागाष्टकम्; alternate rhyme विदग्धमुखमण्डने प्र० प० १; last three quadrants rhyme in तत्रैव परिच्छेदे ७।

48. Ingenuity in the art of metrical composition has been displayed by

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

some poets in the various forms of चित्रकाव्यम्, to an extent, that has never been approached, perhaps, in any other language. For instance, a poem of 36 stanzas (रामकृष्णकृतं विलोमकाव्यम्) each to read exactly the same from right to left, as from left to right, is a marvellous feat indeed. This is not the limit of their skill, however. The following stanzas read the same in every direction, from right to left, as left to right, and from top to bottom, and back again; some in diagonals, and some zigzag as well. (भारवौ १५स० २५। माघे च १९स० २७, २९, ७२, ४६।)

"दे वा का नि नि का वा दे
वा हि का स्व स्व का हि वा।
का का रे भ भ रे का का
नि स्व भ व्य व्य भ स्व नि॥"

"स का र ना ना र का स
का य सा द द सा य का।
र सा ह वा वा ह सा र
ना द वा द द वा द ना॥"

"सा से ना ग म ना र म्भि
र से ना सो द ना र ता।
ता र ना द ज ना म त्त
धी र ना ग म ना म या॥"

"अ भी क म ति कि नि घ्न
भी ता न न्द स्य ना श नि।
क न त्स का म से ना कि
म न्द का म क म स्य ति॥"

"प्र वृ त्ते वि क स द्द्वा नं सा ध नि ऽप्य वि षा दि भिः।
व वृ षे वि क स द्धा नं यु ध मा प्य वि षा णि भिः॥"

49. Modern Indian Vernaculars have borrowed their metrical types from Classical Sanskrit, and have altered and adapted them, each according to its capacity, and to the genius of its authors. Rhyme has been adopted, in Bengali, and very much amplified. The equisyllabic character of the several verses in a stanza has been also preserved in most of its measures. In this there is great resemblance to the Vedic *árshas*, in-as-much as there is no restriction of long and short in either the Vedic or the Bengali measures. The latter rhyme, however, while the former do not. Blank verse was ushered into existence in the Bengali language by the late M. M. S. Datta in a very attractive style, but it has not as yet thrived very well.

50. The uniform sequence of syllables of like quantity—the very essence of *samavrittam*—was successfully introduced into Bengali by Bha'ratachandra, in a few beautiful specimens, such as भुजङ्गप्रयातं, तोटकं and तूणकम्. The following examples, one of each, are taken from his *chef d'œuvre*, *Annadámangala*.

"সহস্রে সহস্রে চলে ভূত দানা। হুহুঙ্কার হাঁকে উড়ে সর্পবাণা॥
চলে ভৈরবা ভৈরবী নন্দি ভৃঙ্গী। মহাকাল বেতাল তাল ত্রিশৃঙ্গী॥
চলে ডাকিনী যোগিনী ঘোর বেশে। চলে শাঁখিনী পেতিনী মুক্ত কেশে॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

গিয়া দক্ষ-যজ্ঞে সবে যজ্ঞ নাশে। কথা না সরে দক্ষরাজে তরাসে॥
অদূরে মহারুদ্র ডাকে গভীরে। অরেরে অরে দক্ষ দে রে সতীরে॥
ভুজঙ্গপ্রয়াতে কহে ভারতী দে। সতী দে সতী দে সতী দে সতী দে॥"
"বিনয়ে করপদ্ম করে ধরিয়া। কহিছে তরুণী করুণা করিয়া॥
ক্ষম হে পতি হে বঁধু হে প্রিয় হে। নব যৌবন.জোরর যোগ্য নহে॥
গুণসাগর নাগর আগর হে। নট না কর না কর না কর হে॥
শুনি সুন্দর সুন্দরিরে কহিছে। তনু মোর মনোজ-শরে দহিছে॥
তুহি পঙ্কজিনী মুহি ভাস্কর লো। ভয় না কর না কর না কর লো॥
* * * * দ্বিজ ভারত তোটক ছন্দ ভণে॥"

"ভীতি-চূর্ণ কাম-পূর্ণ কাতি মুণ্ড ধারিকে। শম্ভু-বক্ষ-পাদ-লক্ষ-পাদ-পদ্ম চারিকে॥
খর্ব্ব খর্ব্ব দৈত্য সর্ব্ব গর্ব্ব খর্ব্ব কারিকে। সিংহভাব-ঘোর রাব ফেরু পাল পালিকে॥
এহি এহি দেহি দেহি দেবি রক্তদন্তিকে। ভারতায় কাতরায় কৃষ্ণভক্তিমস্তিকে॥"

The last is more Sanskrit than Bengali. All of them have the characteristics of the Sanskrit metres, and, in addition to this, they rhyme like the ordinary Bengali measure, called *Payára*. It may be observed also, that all the three measures are formed of multiples of simple syllabic combinations, *i. e.* they fall into one or other of the ten simple groups (शुद्धा वर्गाः) mentioned before (para 36). The capacity of the Bengali language however has not as yet developed to such an extent, as to admit of the infinite changes of inflexion, affixes and prefixes, by which mainly the uniform sequence of long and short syllables is brought about in the Sanskrit, in such a variety. Our *payára* and *tripadi* have their prototypes in the *yamakakávyam* of the Sanskrit poets, which they resemble in rhyming and equisyllabic characters, but not in the sequence of syllables of like quantity.

ERRATA ET CORRIGENDA.

२२ पृष्ठे १२ पङ्क्तौ, for पुनरन्यैर्भिन्न, read पुनरन्यैः पैङ्गल-प्राकृतग्रन्थमनुकृत्य भिन्न।

२६ „ १-२ पङ्क्तिषु, for नारायण इत्यादि, read पैङ्गलप्राकृतग्रन्थे च,

"जे गंजिअ गडलाहिवइ राउ, उद्दंड दंड जसु जस पसाउ।
गुरु विक्कम विक्कम जिसु जुज्भ, ताकष परक्कम कोइ वुज्भ॥"

३४ पृष्ठे ११ पङ्क्तौ, for बीध्यव्यम्, read बीज्वव्यम्।

३७ „ अन्ते add " इ०।

४६ „ १२ पङ्क्तौ, for बीध्यव्यानि, read बीज्वव्यानि।

६६ „ १२ „ for घरिष्म, read धरित्र।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पारिभाषिकशब्दाः ।

—oo—

१ । संख्यावाचकाः । (संस्कृते प्राकृते च) ।

त्रिसंख्या ... ...शिखी ।

चतुर्संख्या ... ...समुद्रः, वेदः, युगः, अर्थः, अब्धिः ।

पञ्चन् ,, ...इन्द्रियाणि, भूतानि, शरः, खम्, इषुः, अचि ।

षष् ,, ...ऋतुः, रसः, तर्कः, गुह्वक्त्रम् ।

सप्तन् ,, ...स्वराः, ऋषिः, वर्णाः, गीताणि, अश्वाः, लोकाः ।

अष्टन् ,, ...वसुः, गायत्री, करी, फणी ।

नवन् ,, ...ग्रहः, रन्ध्राणि, खं, छिद्रम् ।

दशन् ,, ...दिक्, विराट्, अङ्कः ।

एकादशन्,, ...रुद्राः, त्रिष्टुप् ।

द्वादशन् ,, ...आदित्याः, जगती, मासः, इनः ।

चतुर्दशन् ,, ...मनुः, भुवनम् ।

२ । मात्रावाचकाः । (प्राकृते) ।

मात्रा ... ...कला ।

गुरु ... ...चामरं, हारः, मणिगुणः, वलयं, कङ्कणम् ।

लघु ... ...गन्धः, शरः, शल्यः, अर्गलं, काहलः, सद्द ।

गुरुद्वयं... ... ...कर्णः, कुन्तीपुत्रः ।

लघुद्वयं... ... ...सुप्रियः ।

गुरुलघू... ... ...तूर्यम् ।

लघुगुरू... ... ...नूपुरः, ध्वजः ।

३ । गणवाचकाः । (प्राकृते) ।

चतुर्लघवः ... ...विप्रः, द्विजवरः ।

पञ्चलघवः ... ...पापगणः ।

जगणः... ... ...भूपतिः, पयोधरः, पदातिकः ।

रगणः ... ...योधगणः, नोहल, सुपर्णः ।

भगणः... ... ...चरणः ।

तगणः... ... ...कामावतारः ।

सगणः... ... ...हस्तः, करतलः ।

नगणः... ... ...शरगणः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

छन्दःसारसंग्रहः ।

तुङ्गाभ्रपतिता आपो निम्नखातगता अपि ।
प्रयोजनानुसारेण ददत्यखिलमङ्गलम् ॥१॥
किमाश्चर्य्यं कदाचित्तु सुप्रतिष्ठजनस्य च ।
महोपदेशवाचोहि चर्य्येरन्नधमेन वा ॥२॥
इमामाशामुपाश्रित्य छन्दःसङ्कलनव्रतम् ।
चरितुं चेष्टते मूढ़ो घोषः श्रीचन्द्रमोहनः ॥३॥
"वागर्थाविवसम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥"

सम्यगवदत् कालिदासः, 'वागर्थाविवसम्पृक्तौ पार्वतीपरमेश्वरौ' इति । यथा पार्वतीपरमेश्वरौ नित्यसहवर्त्तिनौ, तथा शब्दार्थावपि । तथापि शाक्तः शक्तिमेवोपास्ते, शैवः शिवञ्च । एवं काव्येऽपि शब्दार्थयोर्गुण-दोषादीनां पृथक् समालोचना युज्यते ।

अनुप्रासयमकादयः शब्दालङ्कारा गद्ये पद्ये च प्रयोक्तव्याः, द्वयेऽपि तुल्यशोभाजनकत्वात् । छन्दस्तु पद्यस्य विशेषलक्षणम् । छन्दसि हि काल-परिमितान्येव वर्णानि प्रयुज्यन्ते । नैवं गद्ये ।

अर्थगुणेषु प्रसादो हि मुख्यः । यदि वाक्यार्थं पाठकाः सम्यक् नोपल-भेरन्, तदा ग्रन्थकारस्य प्रयासो व्यर्थः स्यात् । नहि तेषु पाठकानां चित्ता-कर्षणं न्यूनम् । पाठकानां चित्ताभिनिवेशं विना लेखकस्योद्देश्यं न सिध्यति । रचनाप्रभावेण यदि पाठकानां मनः समाकृष्टं स्यात्, तदैव लेखकप्रयत्नस्य मुख्योद्देश्यसाधनं भवेत् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सामान्यतः किमुद्दिश्य लेखकाः प्रवर्त्तन्ते ? पाठकानां चित्तविनोदनं मनःसमुन्नतिसाधनं वा तदुभयं वेति ।

मनोऽनुरञ्जन-मनःसमुन्नतिसाधनादीनां निदानभूता बहवो गुणाः काव्ये स्वल्पाधिकपरिमाणा दृश्यन्ते । तेषामन्यतमोगुणः चित्रप्रकाशः । पाठकानां चित्तपटे लेखको यच्चित्रं प्रकटयति, तत् यावत्परिमितं परिस्फुटमाकर्षकञ्च भवेत्, तावन्मितमेव लिपेः स्थायि फलं निष्पद्यते । तस्मिंश्चित्रे यदि प्रकृतेः किञ्चन गूढ़रहस्यं निहितं स्यात्, कस्यचिन्नीतिवाक्यस्य जीवन्मूर्त्तिर्वा दृश्येत, तर्हि नूनं पाठकानां चित्तोत्कर्षसाधनं सम्भाव्यते । तत्र यदा मनोहरं किञ्चन दृश्यमङ्कितं स्यात्, तदा कथं न पाठकानां चित्तविनोदनं भवेत् । चित्रकरस्तूलिकया वर्णकैश्च यथा पटं रञ्जयति, तथैव कविः कल्पनया नानाविधै रसैश्च स्वकृतं काव्यं भूषयति । पटाङ्कितचित्रस्य चिरोज्ज्वलाय यथा तैलमिश्रितो वर्णकः प्रयुज्यते, तथैव सुललितं छन्दः काव्यस्येति शम् ।

छन्दःपरिज्ञानप्रयोजने इदं श्रुतिवचनम् ।—

'यो ह वा अविदितार्षेयच्छन्दोदैवतविनियोगेन ब्राह्मणेन मन्त्रेण याजयति, वाध्यापयति वा, स स्थाणुं वर्च्छति, गर्त्तं वा पद्यते प्र वा मीयते पापीयान् भवति, यातयामान्यस्य च्छन्दांसि भवन्त्यथ यो मन्त्रे मन्त्रे वेद सर्व्वमायुरेति श्रेयान् भवत्ययातयामान्यस्य च्छन्दांसि भवन्ति, तस्मादेतानि मन्त्रे मन्त्रे विद्यात् ।' इत्यार्षेयब्राह्मणम् । १प्र० १ ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्रथमोऽंशः ।

प्रथमोऽध्यायः ।

परिभाषा ।

अत्रोक्तग्रन्थसङ्केतः ।

१ ।	पिङ्गलच्छन्दःसूत्रम्	पि॰ इति सङ्केतः ।
२ ।	पिङ्गलस्य प्राकृतच्छन्दोग्रन्थः ...	प्रा॰ ।
३ ।	हलायुधकृता मृतसञ्जीवन्याख्या वृत्तिः	ह॰ ।
४ ।	कालिदासविरचितः श्रुतबोधः ...	श्रु॰ ।
५ ।	केदारभट्टविरचितं वृत्तरत्नाकरम् ...	के॰ ।
६ ।	नारायणभट्टकृता तट्टीका	ना॰ ।
७ ।	वृत्तरत्नाकर-परिशिष्टम्	परि॰ ।
८ ।	गङ्गादाससूरिविरचिता छन्दोमञ्जरी	ग॰ ।

"१ ।	धी श्री स्त्री म् ।	२ ।	व रा सा य् ।
३ ।	का गु हा र् ।	४ ।	व सु धा स् ।
५ ।	सा ते क्व त् ।	६ ।	क दा स ज् ।
७ ।	किं व द भ् ।	८ ।	न ह स न् ।
९ ।	ग्ल ल् ।	१० ।	गन्ते ।
११ ।	ध्रादिपरः ।	१२ ।	हे ।
१३ ।	लौ सः ।" इति पि॰ ।*		

* प्रथमाष्ट-सूत्राणां व्याख्या पञ्चम-पृष्ठे साङ्केतिक-रेखासु संख्यानुसारेण द्रष्टव्या, अत्र हलायुध-वृत्तेरानवमादेवीकृता ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

"९। ग्ग्रहणं ह्रस्वैकाक्षरोपलक्षणार्थम्। तस्य लकारसंज्ञा भवति। ल-शब्दश्च लघुवाचकः। तेन ह्रस्वमक्षरं लघुसंज्ञं भवतीत्यर्थः सम्पद्यते।

१०। ह्रस्वाक्षरस्य पादान्ते वर्त्तमानस्य गुरुसंज्ञातिदिश्यते। ग् इति प्रथमाक्षरप्रतीकेन गुरुशब्दस्य ग्रहणम्।

११। व्यञ्जनसंयोगात् पूर्वस्य ह्रस्वस्य अनुस्वारविसर्जनीयजिह्वामूलीयोपध्मानीयेभ्यश्च गुरुसंज्ञातिदिश्यते।

१२। द्विमात्रस्य दीर्घस्य गकारसंज्ञा क्रियते।

१३। स गकारो द्विमात्रो द्वौ लघू कृत्वा गणनीयः।" इति ह०।

१४। "लः समुद्रा गणः। १५। गौ गन्तमध्यादिर्लश्च।" पि०।

"१४। चतुर्णां लकाराणां गणः इत्येषा संज्ञा विधीयते।

"१५। स हि गणः कदाचिद् गुरुद्वयेन भवति, कदाचिदन्त्येनैकेन गुरुणा, कदाचिन्मध्यमेन, कदाचिदाद्येन, कदाचिच्चतुर्भिर्लघुभिः।" ह०।

२। "म्यरस्तजभ्नगैर्लान्तैरेभिर्दशभिरक्षरैः।
समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना॥
सर्वगो मो मुखान्तलौ यरावन्तगलौ सतौ।
ग्मध्याद्यौ ज्भौ त्रिलो नोऽष्टौ भवन्त्यत्र गणास्त्रिकाः॥

* * * *

ज्ञेयाः सर्वान्तमध्यादिगुरवोऽत्र चतुष्कलाः।
गणाश्चतुर्लघूपेताः पञ्चार्यादिषु संस्थिताः॥
सानुस्वारो विसर्गान्तो दीर्घो युक्तपरश्च यः।
वा पादान्ते लसौ-गुरुर्ज्ञेयोऽन्यो मात्रिको लघुः।" के०।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

३। "संयुक्ताद्यं दीर्घं सानुस्वारं विसर्गसंमिश्रम्।
विज्ञेयमक्षरं गुरु पादान्तस्थं विकल्पेन॥
एकमात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ उच्यते।
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनञ्चार्द्धमात्रकम्॥" श्रु०।

४। "मस्त्रिगुरुस्त्रिलघुश्च नकारो भादिगुरुः पुनरादिलघुर्यः।
जो गुरुमध्यगतो र लमध्यः सोऽन्तगुरुः कथितोऽन्तलघुस्तः॥
गुरुरेको गकारस्तु लकारो लघुरेककः।
क्रमेण चैषां रेखाभिः संस्थानं दर्श्यते यथा॥" ग०।

५। अत्रोक्ताः संज्ञा रेखाभिर्दर्शिताः।—

ह्र=ह्रस्वः=ल=⌣, एकमात्रक। ग्=गुरुः=लौ=—, द्विमात्रकः।

१। म्=— — —	२। य्=⌣ — —
३। र्=— ⌣ —	४। स्=⌣ ⌣ —
५। त्=— — ⌣	६। ज्=⌣ — ⌣
७। भ्=— ⌣ ⌣	८। न्=⌣ ⌣ ⌣

एतेऽष्टौ गणास्त्रिकाः।

१५। गौ=— —, गन्त=स=⌣ ⌣ —, गमध्य=ज=⌣ — ⌣, गादि=भ=— ⌣ ⌣, ला:=न्लौ=⌣ ⌣ ⌣ ⌣।

एते पञ्चकाश्चतुष्कला गणाः।

यतिः=विच्छेदः=विरामः=(:)।

६। "यतिर्विच्छेदः।" पि०।

"यतिः सर्वत्र पादान्ते श्लोकार्द्धे तु विशेषतः।
समुद्रादि पदान्ते च व्यक्ताव्यक्तविभक्तिके॥
क्वचित्तु पदमध्येऽपि समुद्रादौ यतिर्भवेत्।
यदि पूर्व्वापरौ भागौ न स्यातामेकवर्णकौ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पूर्व्वान्तवत् स्वरः सन्धौ क्वचिदेव परादिवत् ।
द्रष्टव्यो यतिचिन्तायां यनादेशः परादिवत् ॥
नित्यं प्राक् पदसम्बन्धाश्चादयः प्राक्पदान्तवत् ।
परेण नित्यसम्बन्धाः प्रादयश्च परादिवत् ॥"

इति यत्युपदेशोपनिषद् । ह०

७ । छन्दोद्विविधं—वैदिकं लौकिकञ्च ।
अत्र लौकिकमेव सङ्कलितम् ।

८ । "आदौ तावद् गणच्छन्दो मात्राच्छन्दस्ततः परम् ।
तृतीयमक्षरच्छन्दः—छन्दस्त्रेधा तु लौकिकम् ॥
आर्य्याद्युद्गीतिपर्य्यन्तं गणच्छन्दः समीरितम् ।
वैताल्यादिचूलिकान्तं मात्राच्छन्दः प्रकीर्त्तितम् ॥
समान्याद्युत्कृतिं यावदक्षरच्छन्द एव च ।" ह० ।

९ । अपिच, "पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा ।
वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेत् ॥" ग० ।

१० । "पिङ्गलादिभिराचार्य्यैर्यदुक्तं लौकिकं द्विधा ।
मात्रावर्णविभेदेन छन्दस्तदिह कथ्यते ॥" के० ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

द्वितीयोऽध्यायः ।

अथार्य्याधिकारः ।

१। "स्वरा अर्द्धञ्चार्य्यार्द्धम् । २। अत्रायुङ् न ज् । ३। षष्ठोज् । ४। न्लौ वा । ५। न्लौ चेत् पदं द्वितीयादि । ६। सप्तमः प्रथमादि । ७। अन्त्ये पञ्चमः । ८। षष्ठश्च ल् ।"
पि० ।

"लक्ष्मैतत् सप्तगणा गोपिता भवति नेह विषमे जः ।
षष्ठोऽयं नलघू वा प्रथमेऽर्द्धे नियतमार्य्यायाः ॥
(५) षष्ठे द्वितीयलात् परके न्ले मुखलाच्च सयतिपदनियमः । (६)
(७) चरमेऽर्द्धे पञ्चमके तस्मादिह भवति षष्ठो लः ॥" के० ।

५। "तस्यैव षष्ठस्य चतुर्लघोर्गणस्य द्वितीयलघोः पूर्वं प्रथमलघ्वन्तं सयतिपदनियमः ।

६। "परके 'सप्तमः' । सप्तमके चतुर्लघौ कृते सति, मुखलात् सप्तमस्य प्रथमलघोः पूर्वं षष्ठगणान्ते सयतिपदं नियस्यति ।

७। "द्वितोयेऽर्द्धे पञ्चमके न्ले चतुर्लघौ तस्मान्मुखलघोः पूर्वम्, अर्थाच्चतुर्थान्ते पदं समाप्यते, इत्यनुषङ्गेण पूर्वपदाध्याहारेण योज्यम् ।" ना० ।

"यस्याः पादे प्रथमे द्वादश मात्रास्तथा तृतीयेऽपि ।
अष्टादश द्वितीये चतुर्थके पञ्चदश सार्य्या ॥" श्रु० ।

२। "त्रिषु गणेषु पादः पथ्यादौ च ।" पि० ।

द्वादशमात्रासु यतिरिति ।

३। "विपुलाऽन्या ।" पि० ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

विपुलास्तिस्र आद्यन्तोभयपूर्व्विकाः । यत्र प्रथमार्द्धे द्वादशमात्रासु यतिर्न भवति, अन्त्येऽर्द्धे तु भवति, सादिविपुला, विपर्य्यस्तान्त्यविपुला । उभयार्द्धयोर्द्वादशमात्रासु यत्र यतिर्न भवति सोभयविपुलेति ।

४ । "चपला द्वितीयचतुर्थौ गमध्ये जौ ।" पि० ।

"द्वितीयचतुर्थौ गणौ मध्यगुरू भवतः, प्रथमश्चान्तगुरुः (⏑ ⏑ —), तृतीयो द्विगुरुः (— —), पञ्चमश्चादिगुरुः (— ⏑ ⏑), शेषं यथा-प्राप्तम् । एवं गकारयोर्मध्ये द्वितीयचतुर्थौ जकारौ भवतः, सार्य्या चपला नाम ।" ह० ।

नेयं रेखाप्रदर्शनी सूत्रसम्मता, अपरन्तु उदाहरणविरुद्धा ।*

"विपुलापूर्व्वकं महाचपलोदाहरणम् ।

१ २ज ३ ४ज ५* ६ज ७

चिवुके कपोल-देशेऽपि कूपिका दृश्यते स्मिते यस्याः ।

२ज ४ज ५* ६ ७

विपुलान्वयप्रसूतापि जायते सा महाचपला ॥" ह० ।

अत्र प्रथमपञ्चमयोर्गणयोर्विकल्पः समीचीनो मन्यते । प्रथमस्य (⏑ ⏑ —) वा (— —), पञ्चमस्य (— ⏑ ⏑) वा (— —) चेति ।

५ । "पूर्व्वे मुखपूर्व्वा । जघनपूर्वेतरत्र ।
उभयोर्महाचपला ।" पि० ।

यस्याः प्रथमार्द्ध एव चपलालक्षणं भवति नान्त्ये, सा मुखचपला, विपर्य्यस्ता जघनचपला । यस्या उभयोरर्द्धयोश्चपलालक्षणं भवति, सा आर्य्या महाचपला नाम ।

६ । "एकैव भवति पथ्या विपुलास्तिस्रस्ततश्चतस्रस्ताः ।
चपलाभेदैस्त्रिभिरपि भिन्ना, इति षोड़शार्य्याः स्युः ॥
गीतिचतुष्टयमित्थं प्रत्येकं षोड़शप्रकारं स्यात् ।
साकल्येनार्य्याणामशीतिरिव भेदाः स्युः ॥" ह० ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सप्त-चतुष्कल-गणाः।

		१ गण्	२	३ गण्	४	५ गण्	६	७ गण्	अर्द्धगणः।	मात्रासंख्या।
१।	आद्यार्द्धे			(:)			ज्, न्लौ वा			३०
	अन्यार्द्धे			(:)			ल्			२७
२।	आ०	—	⏑ — ⏑	— — (:)	⏑ — ⏑	—	ज्, न्लौ वा			३०
	अ०			(:)			ल्			२७
३।	आ०			(:)			ज्, न्लौ वा			३०
	अ०	—	⏑ — ⏑	— — (:)	⏑ — ⏑	—	ल्			२७
४।	आ०	—	⏑ — ⏑	— — (:)	⏑ — ⏑	—	ज्, न्लौ वा			३०
	अ०	—	⏑ — ⏑	— — (:)	⏑ — ⏑	—	ल्			२७

१। पथ्यार्य्या। २। मुखचपला-पथ्यार्य्या।

३। जघनचपला-पथ्यार्य्या। ४। महाचपला-पथ्यार्य्या।

इमाश्चतस्रः पथ्याः। आसामाद्यार्द्ध-स्थितानि (:) यति-चिह्नानि चेदपनीयेरन्, तदा क्रमेण आदिविपुलायाः चत्वारः प्रकारा भवेयुर्यथा (१) आदिविपुलार्य्या, (२) आदिविपुला-मुखचपलार्य्या, (३) आदिविपुला-जघन-चपलार्य्या, (४) आदिविपुला-महाचपलार्य्या चेति। तद्वत् अन्त्यार्द्धस्थित-यति-चिह्नापनयनेन अन्त्य-विपुलायाश्चत्वारः प्रकारा भवेयुः। सर्व्वाणि (:) यति-चिह्नानि चेदपनीयेरन्, तदा उभयविपुलायाश्चत्वारो-भेदा भवेयुः। इत्थमार्य्यायाः षोड़श-भेदा विस्पष्टाः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

गीतिः ।

"आर्य्यार्द्धसमा गीतिः ।" पि० ।

"एतदुक्तं भवति द्वितीयेऽप्यर्द्धे षष्ठो गणो जकारो न्लौ वा कर्त्तव्यः ।" ह० ।

"आर्य्या-पूर्व्वार्द्धसमं द्वितीयमपि भवति यत्र हंसगते ।
छन्दोविदस्तदानीं गीतिं तामम्रतवाणि भाषन्ते ॥" श्रु० ।

यदुक्तमार्य्या-प्रकरणे तत् सर्व्वमत्रापि वक्तव्यम् । तेन हि गीतेरपि षोड़श-भेदाः स्युः ।

उपगीतिः ।

"अन्त्येनोपगीतिः ।" पि० ।

"अन्त्येनार्द्धेन सममाद्यमर्द्धं यस्याः, सा आर्य्या उपगीतिर्नाम ।" ह० ।

"आर्य्योत्तरार्द्ध-तुल्यं प्रथमार्द्धमपि प्रयुक्तं चेत् ।
कामिनि तामुपगीतिं प्रतिभाषन्ते महाकवयः ॥" श्रु० ।

पूर्व्वदर्शित-न्यायेन एतस्या अपि षोड़श-भेदा विस्पष्टाः ।

उद्गीतिः ।

"उत्क्रमेणोद्गीतिः ।" पि० ।

"आद्यमन्त्यं भवत्यर्द्धमन्त्यमादौ, सा उद्गीतिर्नामार्य्या ।" ह० ।

अस्याः षोड़श-भेदाः पूर्व्वमेवोह्याः ।

आर्य्यागीतिः ।

"अर्द्धे वसुगण आर्य्यागीतिः ।" पि० ।

"अष्टमोऽपि गणश्चतुर्मात्रको भवतीत्यर्थः । विशेषाभावाद्द्वितीयमप्यर्द्धं तादृशमेव । अत्रापि षष्ठो गणो द्विविकल्प एव नलकारः । अर्द्ध-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इति वर्त्तमाने पुनरर्द्धग्रहणाद् गणग्रहणाच्च द्वयमपि पथ्यादि-लक्षण-पूर्व्विका आर्य्यागीतिः ।" ह० ।

तस्मादेव षोड़श-भेदा निर्द्दिष्टाः ।

सप्त-चतुष्कल-गणाः ।

		१ न ज्	२	३ न ज्	४	५ न ज्	६	७ न ज्	अर्द्धगणः ।	मात्रासंख्या ।
१ ।	आद्यार्द्धं			(:)			ज्, न्लौ वा			३०
	अन्त्यार्द्धं			(:)			ज्, न्लौ वा			३०
२ ।	आ०			(:)			ल्			२७
	अ०			(:)			ल्			२७
३ ।	आ०			(:)			ल्			२७
	अ०			(:)			ज्, न्लौ वा			३०

अष्ट-चतुष्कल-गणाः ।

		१ न ज्	२	३ न ज्	४	५ न ज्	६	७ न ज्	८	मा० सं० ।
४ ।	आ०			(:)			ज्, न्लौ वा			३२
	अ०			(:)			ज्, न्लौ वा			३२

१ । पथ्यागीतिः । २ । पथ्योपगीतिः ।

३ । पथ्योद्गीतिः । ४ । पथ्यार्य्यागीतिः ।

अत्र गीति-चतुष्टयानां प्रत्येकं पथ्या-रूपं साङ्केतिक-चिह्नेन दर्शितम् । आर्य्यायाः पथ्या-रूपं यैः परिवर्त्तनैः षोड़श-विधं प्रदर्शितं, तैः परिवर्त्तनैरेव गीति-चतुष्टयानां प्रत्येकरूपं षोड़श-विधं बोद्धव्यम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

आर्य्याभेदानामुदाहरणानि ।

१ । पथ्यायाः ।

(क) अत्र चतुर्लघु-षष्ठगणस्य प्रथमलघ्वन्तं यतिः ।

"मणिबन्धनतो गलितं (:) संक्रान्तोशीर(:)परिमलं तस्याः ।
हृदयस्य निगड़मिव मे (:) मृणाल-वलयं स्थितं पुरतः ॥

सुभग-सलिलावगाहाः (:) पाटल-संसर्ग(:)सुरभिवनवाताः ।
प्रच्छाय-सुलभ-निद्रा (:) दिवसाः परिणाम-रमणीयाः ॥" शकु० ।

"स्तन-युगमश्रु-स्नातं (:) समीपतरवर्त्ति(:)हृदय-शोकाग्नेः ।
चरति विमुक्ताहारं (:) व्रतमिव भवतो रिपुस्त्रीणाम् ॥" कादम्बरी ।

"मृग-मीन-सज्जनानां (:) तृण-जल-सन्तोष(:)विहित-वृत्तीनाम् ।
लुब्धक-धीवर-पिशुना (:) निष्कारण-वैरिणो जगति ॥

यदचेतनोऽपि पादैः (:) स्पृष्टः प्रज्वलति(:)सवितुरतिकान्तः ।
तत्तेजस्वी पुरुषः (:) परकृत-निकृतङ्कथं सहते ॥" भर्त्तृहरिः ।

"परिणत-कठोर-पुष्कर(:)गर्भच्छदपीन(:)मसृण-सुकुमारः ।
नन्दयति चन्द्र-चन्दन (:) निस्यन्दजड़स्तव स्पर्शः ॥" भवभूतिः ।

(ख) षष्ठो गणो मध्यगुरुः ।

"रम्यास्तपोधनानां(:)प्रतिहत-विघ्नाः क्रियाः समवलोक्य ।
ज्ञास्यसि कियद् भुजो मे (:) रक्षति मौर्वीकिणाङ्क इति ॥

आपरितोषाद्विदुषां (:) न साधु मन्ये प्रयोग-विज्ञानम् ।
बलवदपि शिक्षितानां(:) मात्मन्यप्रत्ययं चेतः ॥

कः पौरवे वसुमतीं (:) शासति शासितरि दुर्विनीतानाम् ।
अयमाचरत्यविनयं (:) मुग्धासु तपस्विकन्यासु ॥" शकु० ।

"छिन्नापि रोहति तरुः (:) क्षीणोऽप्युपचीयते पुनश्चन्द्रः ।
इति विमृशन्तः सन्तः (:) सन्तप्यन्ते न ते विपदा ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अप्रिय-वचन-दरिद्रैः (:) प्रिय-वचनाढ्यैः स्वदार-परितुष्टैः।
पर-परिवाद-निवृत्तैः(:)क्वचित् क्वचिन्मण्डिता वसुधा॥" भर्त्तृहरिः।

"प्रसरति शशधर-बिम्बे (:) विहित-विलम्बे च माधवे विधुरा।
विरचित-विविध-विलापं (:) सा परितापं चकारोच्चैः॥" गी० गी०।

२। आदिविपुलायाः।

"स्निग्ध-च्छाया-लावण्य-लेपिनी किञ्चिदवनत-घ्राणा।
मुख-विपुला सौभाग्यं (:) लभते स्त्रीत्याह माण्डव्यः॥" ह०।

३। अन्तविपुलायाः।

"चित्तं हरन्ति हरिणी-दीर्घ-दृशः कामिनां कलालापैः।
नीवी-विमोचन-व्याज-कथित-जघना जघनविपुला॥" ह०।

४। उभयविपुलायाः।

"या स्त्री कुचकलस-नितम्बमण्डले जायते महाविपुला।
गम्भीर-नाभिरतिदीर्घ-लोचना भवति सा सुभगा॥" ह०।

५। पथ्यापूर्वं मुखचपलायाः।

"अतिदारुणा द्विजिह्वा परस्य मर्मानुसारिणी कुटिला।
दूरात् परिहरणीया नारी नागीव मुखचपला॥" ह०।

६। आदिविपुलापूर्व्वकं मुखचपलायाः।

"यस्याश्च लोचने पिङ्गले भ्रुवौ सङ्गते मुखं दीर्घम्।
विपुलोन्नताश्च दन्ताः कान्ताऽसौ भवति मुखचपला॥" ह०।

७। उभयविपुलापूर्व्वं मुखचपलायाः।

"विपुलाभिजात-वंशोद्भवापि रूपातिरेक-रम्यापि।
निःसार्य्यते गृहाद्वल्लभापि यदि भवति मुखचपला॥" ह०।

८। पथ्यापूर्वं जघनचपलायाः।

"यत् पादस्य कनिष्ठा (:) न स्पृशति महीमनामिका वापि।
सा सर्व्व-धूर्त्त-भोग्या (:) भवेदवश्यं जघनचपला॥" ह०।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

९ । अन्तविपुलापूर्व्वकं जघनचपलायाः ।

"यस्याः पादाङ्गुष्ठं व्यतीत्य याति प्रदेशिनी दीर्घा ।
विपुले कुले प्रसूतापि सा ध्रुवं जघनचपला स्यात् ॥" ह० ।

१० । महाविपुलापूर्व्वकं जघनचपलायाः ।

"मकरध्वज-सद्मनि दृश्यते स्फुटं तिलक-लाञ्छनं यस्याः ।
विपुलान्वयाभिजातापि जायते जघनचपलासौ ॥" ह० ।

११ । पथ्यापूर्व्वकं महाचपलायाः ।

"हृदयं हरन्ति नार्य्यो मुनेरपि भ्रू-कटाक्ष-विक्षेपैः ।
दोर्मूल-नाभिदेशं निदर्शयन्त्यो महाचपलाः ॥" ह० ।

१२ । विपुलापूर्व्वकं महाचपला, ८म-पृष्ठे उदाहृता ।

१३ । गीतिः । (क) पथ्या,

"मधुरं वीणा-रणितं पञ्चम-सुभगश्च कोकिलालापः ।
गीतिः पौरवधूनामधुना कुसुमायुधं प्रबोधयति ॥" ह० ।

अपिच,

"तुज्झ ण आणे हिअअं मह उण कामो दिवा वि रत्तिं वि ।
णिग्घिण तवेइ बलिअं तुइ वुत्त-मणोरहाइं अङ्गाइं ॥" शकु० ।

(ख) आदिविपुला,

"इयमपरा विपुला-गीतिरुच्यते सर्व्व-लोक-हित-हेतोः ।
यदनिष्टमात्मनस्तत्परेषु भवतापि मा क्वचित् कारि ॥" ह० ।

(ग) पथ्या-महाचपला,

"कामञ्चकास्ति गीतिर्मृगीदृशां सीधुपान-चपलानाम् ।
सुरतञ्च मुक्तलज्जं निरर्गलालाप-मणित-रमणीयम् ॥" ह० ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(घ) महाचपला-महाविपुला।

"पञ्चेषु-वल्लभः पञ्चम-ध्वनिस्तत्र भवति यदि विपुलः।
चपलं करोति कामाकुलं मनः कामिनामसौ गीतिः॥" ह०।

१४। उपगीतिः। (क) पथ्या,

"गान्धर्वं मकरध्वज-देवस्यास्त्रं जगद्विजयि।
इति समवेक्ष्य मुमुक्षुभिरुपगीतिस्त्यज्यते देशः॥" ह०।

(ख) महाविपुला,

"विपुलोपगीति-झङ्कार-मुखरिते भ्रमरमालानाम्।
रेवा-तपोवने वस्तुतोऽस्तु सततं मम प्रीतिः॥" ह०।

तथाच, गीतगोविन्दे। सप्तमो गणो ज् इत्येव प्रभेदः।

"रमयति सुदृशं कामपि सुभृशं, खल-हलधर-सोदरे।
किमफलमवसं चिरमिह विरसं, वद सखि विटपोदरे॥
इह-रस-भणने कृत-हरि-गुणने, मधु-रिपु-पद-सेवके।
कलि-युग-चरितं न वसतु दुरितं, कवि-नृप-जयदेवके॥"

(ग) पथ्या-महाचपला,

"विषयामिषाभिलाषं करोति चित्तं सदा चपलम्।
वैराग्य-भावनानां तथोपगीत्या भवेत् स्वस्थम्॥" ह०।

(घ) महाचपला-महाविपुला,

"विपुलोपगीति सन्त्यज्यतामिदं स्वरुचकं भिक्षो।
विषयाभिलाष-दोषेण बाध्यते चञ्चलं चित्तम्॥" ह०।

१५। उद्गीतिः। (क) पथ्या,

"व्याध इवोद्गीतिरवैः प्रथमं तावन्मनो हरसि।
दुर्नयकर विश्राम्यसि पश्चात् प्राणिषु विप्रियैः शल्यैः॥" ह०।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(ख) महाविपुला,

"एषा तवापरोद्गीतिरत्र विपुला परिभ्रमति ।
त्वद्वल्लभापि यत्कीर्त्तिरखिलदिक्पाल-पार्श्वमुपयाति ॥" ह० ।

(ग) पथ्या-महाचपला,

"उद्गीतिरत्र नित्यं प्रवर्त्तते काम-चपलानाम् ।
तस्मान् मुने विमुञ्च प्रदेशमेतं समेतमेताभिः ॥" ह० ।

(घ महाविपुला महाचपला,

"विपुला पयोधर-श्रोणि मण्डले चक्षुषोश्चपला ।
उद्गीति-शालिनी कामिनी च सा बालिनी मनो हरति ॥" ह० ।

१६ । आर्य्यागीतिः । (क) पथ्या,

"हृदय सदा यादवतः पापाटव्या दुरासदायादवतः ।
अरिसमुदायादवतस्त्रिजगन्मागाः स्मरेण दायादवतः ॥" नलोदयः ।

"अजमजरममरमेकं प्रत्यक् चैतन्यमीश्वरं ब्रह्मपरम् ।
आत्मानं भावयतो भवमुक्तिः स्यादितीयमार्य्यागीतिः ॥" ह० ।

(ख) महाविपुला,

"विषयाभिलाष-मृगतृष्णिका ध्रुवं हरति हरिणमिव हतहृदयम् ।
विपुलात्म-मोक्ष-सुख-काङ्क्षिभिस्ततस्त्यज्यते विषय-रस-सङ्गः ॥" ह० ।

(ख) पथ्या-जघनचपला,

"वाताहतोर्म्मिमाला-चपलं सम्प्रेक्ष्य विषयसुखमल्पतरम् ।
मुक्त्वा समस्तसङ्गं तपोवनान्याश्रयन्ति तेनात्मविदः ॥" ह० ।

(घ) महाविपुला-महाचपला,

"चपलानि चक्षुरादीनि चित्तहारी च हन्त हत-विषयगणः ।
एकान्तशीलिनां योगिनामतो भवति परम-सुख-सम्प्राप्तिः ॥" ह०।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तृतीयोऽध्यायः ।

अथो वैतालीयाधिकारः ।

१ । "वैतालीयं द्विस्वरा अयुक्पादे, युग्वसवोऽन्ते ल्गौः ।" पि० ।

"यत्र प्रथमे पादे तृतीये च चतुर्द्दश लकारा भवन्ति, द्वितीये चतुर्थे च षोड़श लकाराः, तद्वैतालीयं नाम छन्दः । उभयोरपि पादयोरन्ते रेफ-लकार-गकाराः कर्त्तव्याः । तत्रोदाहरणम् ।

शव-शोणित-पङ्कराञ्जितं, पुरुषान्त्र-ग्रथितोर्द्ध-मूर्द्धजम् ।
वपुरन्तर-वह्नि-दीपितं, वैतालीयमिदं विलोक्यताम् ॥" ह० ।

२ । "गौपच्छन्दसकम् ।" पि० ।

"अस्मिन् वैतालीये छन्दस्यन्ते गकारश्चेदधिको भवति, तदौपच्छन्दसकं नाम छन्दः । तत्रोदाहरणम् ।

परमर्म-निरीक्षणानुरक्तं, स्वयमत्यन्तनिगूढ़-चित्त वृत्तिम् ।
अनवस्थितमर्थलुब्धमारादौपच्छन्दसकं जहीहि मित्रम् ॥" ह० ।

"औपच्छन्दसिकम्" इति के० ।

३ । "आपातलिका भगौग् ।" पि० ।

"रेफ-लकार गकाराणामपवादो भकारो गकारद्वयञ्च । 'द्विस्वरा अयुक्-पादे, युग्वसवोऽन्ते' इत्यनुवर्त्तते । तत्रोदाहरणम् ।

पिङ्गलकेशी कपिलाक्षी, वाचाटा विकटोन्नत-दन्ती ।
आपातलिका पुनरेषा, नृपति-कुलेऽपि न भाग्यमुपैति ॥" ह० ।

२

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

४ । "शेषे परेण युङ् न साकम् ।" पि० ।

"अत्र येषां नियम उक्तस्तद्व्यतिरिक्तो यो लकारवर्गः सः शेषः । युक् परेण न मिश्रीकार्य्यः, द्वितीयस्तृतीयेन, चतुर्थः पञ्चमेन, युक्पादे षष्ठश्च सप्तमेन । एवं वदता शेषाणां मिश्रीभावोऽप्यनुज्ञातः ।" ह० ।

५ । "षट् चामिश्रा युजि ।" पि० ।

"अत्र द्वितीय-चतुर्थयोः पादयोः षड्-लकारा अमिश्रा न कर्त्तव्याः, पृथक् पृथक् न प्रयोक्तव्या इत्यर्थः । प्रथम-तृतीययोश्च पादयोः स्वरुचि ।" ह० ।

६ । "पञ्चमेन पूर्वः साकं प्राच्यवृत्तिः ।" पि० ।

"युजीत्यनुवर्त्तते । यदा युक्पादे पञ्चमेन लकारेण पूर्वः सङ्गच्छते, तदा प्राच्यवृत्तिर्नाम वैतालीयं भवति । शेषं यथाप्राप्तम् ।" ह० ।

७ । "अयुक् तृतीयेनोदीच्यवृत्तिः ।" पि० ।

"अयुक्-पादे तृतीयेन लकारेण यदि पूर्वः सङ्गच्छते, तदा उदीच्यवृत्तिर्नाम वैतालीयम् । शेषं यथाप्राप्तमेव ।" ह० ।

८ । "आभ्यां युगपत् प्रवृत्तकम् ।" पि० ।

"युक्-पादे पञ्चमेन चतुर्थोऽयुक्-पादे तृतीयेन द्वितीयः सङ्गच्छते, इत्यर्थः ।" ह० ।

९ । "अयुक् चारुहासिनी ।" पि० ।

"यस्य सर्वे पादा अयुग्लक्षणयुक्ताः, तद्वैतालीयं चारुहासिनी नाम । किन्तल्लक्षणं, चतुर्द्दशमात्रत्वं, तृतीयेन पूर्वस्य योगः ।" ह० ।

१० । "युगपरान्तिका ।" पि० ।

"युग्लक्षण-युक्तैश्चतुर्भिः पादैः अपरान्तिका नाम वैतालीयम् । किं तल्लक्षणं, षोड़श-मात्रत्वं पञ्चमेन पूर्वस्य योगः षण्णां मिश्राणां प्रयोगश्च ।" ह० ।

११ । वैतालीयान्तर्गते वृत्ते—सुन्दर्यपरवक्त्रे । औपच्छन्दसकान्तर्गता मालभारिणी-पुष्पिताग्रा-भद्रविराजः । आपातलिकान्तर्गता वेगवतीति ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

१२। एतानि रेखाभिर्दर्श्यन्ते ।

लकाराणां नियमः ।

मात्राः		छन्दोनामानि	पादे	१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६	१७	१८
६०	वैतालीयभेदाः	वैतालीयम् (क)	अयुक्		,		,			—		⌣	—		⌣	—					
			युक्		,		,		,			—		⌣	—		⌣	—			
		प्राच्यवृत्तिः (ख)	युक्		,		—		,			—		⌣	—		⌣	—			
		उदीच्यवृत्तिः (ग)	अयुक्		—		,			—		⌣	—		⌣	—					
		प्रवृत्तकम् (घ)	अयुक्		—		,			—		⌣	—		⌣	—					
			युक्		,		—		,			—		⌣	—		⌣	—			
५६		चारुहासिनी (ङ)	सर्वे		—		,			—		⌣	—		⌣	—					
६४		अपरान्तिका (च)	सर्वे		,		—		,			—		⌣	—		⌣	—			
६८		औपच्छन्दसकम्	अयुक्		,		,			—		⌣	—		⌣	—		—			
			युक्		,		,		,			—		⌣	—		⌣	—		—	
६०		आपातलिका	अयुक्		,		,			—		⌣⌣		—		—					
			युक्		,		,		,			—		⌣⌣		—		—			

कमा (,) इति चिह्नेन 'परेण न साकम्' इत्येव बोद्धव्यम् । इत्थं प्राच्यवृत्तेः तृतीय-षष्ठयोरक्षरयोर्लघुत्वं निष्पन्नमुदीच्यवृत्तेः प्रथम-चतुर्थयोश्च । प्रवृत्तक-चारुहासिन्यपरान्तिकानामनुरूपाक्षराणाञ्च । युजि षट् चामिश्रा न कर्त्तव्याः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

१३ । उदाहरणानि ।

१ । (क) शुद्धवैतालीये,

"समर-शिरसि सज्यते द्विषां, नव निशितायुधवृष्टिरग्रतः ।
कुवलय दल-दीर्घ चक्षुषां, प्रमदानां न कटाक्ष-वीक्षितम् ॥" ह० ।

(ख) प्राच्यवृत्त्याम्,

"विपुलार्थ-सुवाचकाक्षराः, कस्य नाम न हरन्ति मानसम् ।
रस-भाव-विशेष-पेशलाः, प्राच्यवृत्ति-कवि-काव्य-सम्पदः ॥" ह० ।

(ग) उदीच्यवृत्त्याम्,

"अवाचकमनूर्जिताक्षरं, श्रुतिदुष्टं श्रुतिकष्टमक्रमम् ।
प्रसाद-रहितञ्च नेष्यते, कविभिः काव्यमुदीच्यवृत्तिभिः ॥" ह० ।

(घ) प्रवृत्तके,

"इदं भरत-वंश-भूभृतां, श्रूयतां श्रुति-मनो-रसायनम् ।
पवित्रमधिकं शुभोदयं, व्यास-वक्त्र-कथितं प्रवृत्तकम् ॥" ह० ।

(ङ) चारुहासिन्याम्,

"मनाक्-प्रसृत-दन्त-दीधितिः, स्मरोल्लसित-गण्डमण्डला ।
कटाक्ष-ललिता तु कामिनी, मनो हरति चारुहासिनी ॥" ह० ।

(च) अपरान्तिकायाम् ।

"स्थिर-विलास-नत-मौक्तिकावली, कमल-कोमलाङ्गी मृगेक्षणा ।
हरति कस्य हृदयं न कामिनः, सुरत-केलि कुशलापरान्तिका ॥" ह० ।

शुद्ध-वैतालीयस्य युक्-पाद-लक्षणयुक्तैश्चतुर्भिः पादैरपरान्तिकोदाहरणमपि दृश्यते, यथा भागवते, ४।७।२९।

"इदमप्यच्युत विश्वभावनं, वपुरानन्दकरं मनोदृशाम् ।
सुरविद्विट्क्षपणैरुदायुधैर्भुजदण्डैरुपपन्नमष्टभिः ॥"

२ । औपच्छन्दसके ।

"परयुवतिषु पुत्रभावमादौ, कृत्वा प्रार्थयते पुनः पतित्वम् ।
इदमपरमिहोच्यते विशेषादौपच्छन्दसकं खलस्य वृत्तम् ॥" ह० ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

औपच्छन्दसकस्य युक्पाद-लक्षण-युक्तैश्चतुर्भिः पादैश्छन्दोऽपि दृश्यते, यथा भट्टिकाव्ये, २२।३५।

"काव्यमिदं विहितम्मया वलभ्यां, श्रीधर-सूनु-नरेन्द्र-पालितायाम्।
कीर्त्तिरतो भवतां नृपस्य तस्य, क्षेमकरः क्षितिपो यतः प्रजानाम्॥"

३। आपातलिकायाम्।

"अभिरमयति किन्नरकण्ठी, हंसगतिः श्रवणायतनेत्रा।
विशद-कमल-कोमल गात्री, युवतिरियं हृदयं तरुणानाम्॥" हृ०।

चतुर्थोऽध्यायः।

अथ मात्रासमकाधिकारः।

१। "गन्ता द्विर्वसवो मात्रासमकं नवमः।" पि०।

"यत्र पादे गन्ता सन्तः षोड़श लकारा भवन्ति, तन्मात्रासमकं नाम छन्दः। अन्ते द्वाभ्यामेको गुरुः कर्त्तव्यः। नवमश्च लकार एव। शेषे परेण युङ् न साकमित्यनुवर्त्तनीयम्।" हृ०।

२। "द्वादशश्च वानवासिका।" पि०।

"यस्य मात्रासमकस्य पादे द्वादशो लकारः स्वरूपेणावतिष्ठते, चकारान्नवमश्च, तन्मात्रासमकं वानवासिका नाम।" हृ०।

३। विश्लोकः पञ्चमाष्टमौ।" पि०।

"यत्र चतुष्पादेषु पञ्चमाष्टमौ लकारौ तिष्ठतः, शेषं यथाप्राप्तं, तन्मात्रासमकं विश्लोको नाम।" हृ०।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

४ । **"चित्रा नवमश्च ।"** पि० ।

"यस्य नवमः लकार एवावतिष्ठते, चकारात् पञ्चमाष्टमौ च, तन्मात्रा-समकं चित्रा नाम ।" ह० ।

५ । **"परयुक्तेनोपचित्रा ।"** पि० ।

"दशमेन सहैकीभूतेन नवमेन उपचित्रा नाम भवति ।" ह० ।

६ । **"एभिः पादाकुलकम् ।"** पि० ।

"एषां पञ्चानां मध्ये यैः कैश्चिदपि चतुर्भिः पादैः पादाकुलकं नाम ।" ह० ।

७ । **"प्रतिपद यमकित-षोड़शमात्रा, नवम-गुरुत्व-विभूषित-गात्रा ।
पज्झटिका पुनरत्र विवेकः, क्वापि न मध्यगुरुर्गण एकः ॥"** ग० ।

उपचित्रा-सदृशी एषा, यमकेनैव विशेषिता । अन्ते गिति लक्षणं नोक्तमप्यनुमेयं शाङ्कर-मोहमुद्गर-प्रयोगविद्भिः । शेषे परेण युङ् न साकमिति सामान्य-लक्षणेन हि मध्यगुरुर्गणो बाध्यते ।

पज्झटिका पुनरन्यैर्भिन्न-लक्षणा कृता, यथा—

"प्रतिपादं चत्वारः चतुष्कला गणास्तत्रान्तिमो जगण एव, एवं चतुर्भिः पादैश्चतुःषष्टिमात्रं पज्झटिकाच्छन्दः ।" ना० ।

८ । **"नवम-गुरुत्वं व्यभिचरति च । रणधरणी-जितरजनिविहारीति ।"**

ग० ।

९ । शुद्धमात्रासमकान्तर्गतवृत्तानि—पङ्क्तेः पणवस्त्रिष्टुभो मोटनकं जगत्यास्तोटकञ्च ।

१० । वानवासिकान्तर्गतवृत्तानि—पङ्क्तेर्मत्ता त्रिष्टुभो भ्रमरविलसिता कुड्मलदन्ती च, जगत्याः कुसुम-विचित्रा ललना (पि०) च, शर्कर्याः सुपवित्रं प्रहरणकलिता चक्रपदञ्च, अतिशर्कर्याश्चन्द्रावर्त्ता माला मणिगुणनिकरश्च ।

११ । विश्लोकान्तर्गतवृत्तानि—अतिजगत्याश्चण्डी, शर्कर्याः सुपवित्रं चक्रपदञ्च, अतिशर्कर्याश्चन्द्रावर्त्ता माला मणिगुणनिकरश्च ।

१२ । चित्रान्तर्गतवृत्तानि—शर्कर्याः सुपवित्रं चक्रपदञ्च, अतिशर्कर्याश्चन्द्रावर्त्ता माला मणिगुणनिकरश्च ।

१३ । उपचित्रान्तर्गतवृत्तानि—अर्द्धसमवृत्तस्य द्रुतमध्या, अनुष्टुभो विद्युन्माला, पङ्क्तेः रुक्मवती सुषमा च, त्रिष्टुभो दोधकोऽनवसिता च, जगत्यास्तामरसम्, अतिजगत्याश्चण्डी चेति ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

१४ । अत्र मात्रासमक-भेदा रेखाभिर्दर्श्यन्ते ।

<table>
<tr><th rowspan="2">छन्दो-नामानि</th><th>पादचतुष्टयानां प्रत्येकं षोड़शमात्रिकं</th></tr>
<tr><th>१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६</th></tr>
<tr><td>मात्रासमकं (क)</td><td>| | , | | , | | , | | | ⌣ | , | | , | | | —</td></tr>
<tr><td>वानवासिका (ख)</td><td>| | , | | , | | , | | | ⌣ | , | | ⌣ | | | —</td></tr>
<tr><td>विश्लोकः (ग)</td><td>| | , | | | ⌣ | , | | ⌣ | | , | | , | | | —</td></tr>
<tr><td>चित्रा (घ)</td><td>| | , | | | ⌣ | , | | ⌣ | ⌣ | , | | , | | | —</td></tr>
<tr><td>उपचित्रा (ङ)</td><td>| | , | | , | | , | | | — | | , | | | —</td></tr>
<tr><td>पादाकुलकं (च)</td><td>| | , | | , | | , | | , | | , | | , | | | —</td></tr>
<tr><td>पज्झटिका (छ)</td><td>| | , | | , | | , | | | — | | , | | | —</td></tr>
<tr><td>रणधरणी</td><td>| | , | | , | | , | | | ⌣ | , | | , | | , | |</td></tr>
</table>

१५ । मात्रासमक-भेदानामुदाहरणानि चोद्धृतानि ।

(क) शुद्ध-मात्रासमके,

"अश्मश्रुमुखो विरलैर्दन्तैर्गम्भीराक्षो मित-नासाग्रः ।
निर्मांस-हनुः स्फुटितैः केशैर्मात्रासमकं लभते दुःखम् ॥" ह० ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(ख) वानवासिकायाम्,

"मन्मथ-चाप-ध्वनि-रमणीयः, सुरत-महोत्सव-पटह-निनादः ।
वनवास-स्त्री-स्वनित-विशेषः, कस्य न चित्तं रमयति पुंसः ॥" ह० ।

(ग) विश्लोके,

"भ्रातर्गुणरहितं विश्लोकं, दुर्नय करण-कदर्थित-लोकम् ।
जातं महित-कुलेऽप्यविनीतं, मित्रं परिहर साधु-विगीतम् ॥" ह० ।

(घ) चित्रायाम्,

"यदि वाञ्छसि परपदमारोढुं, मैत्रीं परिहर सह वनिताभिः ।
मुह्यति मुनिरपि विषयासङ्गाच्चित्रा भवति हि मनसो वृत्तिः ॥" ह० ।

तथा च गीतगोविन्दे,

"श्वसित-पवनमनुपम-परिणाहम्, मदन-दहनमिव वहति सदाहम् ।
दिशि दिशि किरति सजल-कण-जालम्, नयन-नलिनमिव विगलित-नालम् ॥"

(ङ) उपचित्रायाम्,

"यच्चित्तं गुरु-सत्त्वमुदारं, विद्याभ्यास-महाव्यसनञ्च ।
पृथ्वी तस्य गुणैरुपचित्रा, चन्द्र-मरीचि निभैर्भवतीयम् ॥" ह० ।

(च) पादाकुलके, क-ग-ख-ङ-इत्येव-क्रमैः पादैः,

"अलि-वाचालित-विकसित-चूते, काले मदन-समागम-दूते ।
स्मृत्वा कान्तां परिहृत-सार्थः, पादाकुलकं धावति पान्थः ॥" ह० ।

अपि च, ग-ङ-क-ङ-इत्येव-क्रमैः पादैः,

"पुंस्कोकिल-कृत-शोभन-गीते, दक्षिण पवन प्रेरित-शीते ।
मधु-समयेऽस्मिन् कृत-विश्लोकः, पादाकुलकं नृत्यति लोकः ॥" ह० ।

तथा क-ङ-ङ-ग-इत्येव-क्रमैः पादैः,

"चित्तं भ्राम्यत्यनवस्थानं, पादाकुलक-श्लोक-समानम् ।
कायः क्लाम्यति श्राम्यति शक्तिस्तदपि न मम परलोके भक्तिः ॥" ह० ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ङ-ख-ङ-ङ-इत्येव-क्रमैः पादैः,

"परिहृत सर्व्व परिग्रह-लोकः, प्रतिदिन-वर्द्धित-गुरुतर-शोकः ।
दुःख-विवर्द्धित-लोचन-वारिः, पादाकुलकं याति तवारिः ॥" ह० ।

तथा च गीतगोविन्दे,

(घ) "नयन-विषयमपि किशलय-तल्पम्,
(ङ) गणयति विहित-हुताश-विकल्पम् ।
त्यजति न पाणि-तलेन कपोलम्,
बाल-शशिनमिव सायमलीलम् ॥
(घ) हरिरिति हरिरिति जपति सकामम्,
(ङ) विरह-विहित-मरणेव निकामम् ।
(ख) श्रीजयदेव-भणितमिति गीतम्,
सुखयतु केशव-पदमुपनीतम् ॥
(ङ) सजल-नलिनदल-शीलित-शयने,
(ख) हरिमवलोकय सफलय नयने ।
(घ) जनयसि मनसि किमिति गुरु-खेदम्,
(ङ) शृणु मम वचनमनीहित-भेदम् ॥
(ख) हरिरुपयातु वदतु बहु-मधुरम्,
किमिति करोषि हृदयमतिविधुरम् ।
श्रीजयदेव-भणितमतिललितम्,
(ग) सुखयतु रसिकजनं हरिचरितम् ॥"

(छ) पज्झटिकायाम्,

"मा कुरु धन-जन-यौवन-गर्व्वम्, हरति निमिषात्कालः सर्व्वम् ।
मायामयमिदमखिलं हित्वा, ब्रह्मपदं प्रविशाशु विदित्वा ॥
नलिनी-दल-गत-जलमतितरलम्, तद्वज्जीवनमतिशय-चपलम् ।
विद्धि व्याधि-व्याल-ग्रस्तम्, लोकं शोक-हतञ्च समस्तम् ॥"

इति शङ्कराचार्य्यकृते मोहमुद्गरे ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

नारायणभट्टस्य च,

"जि जे गज्जिअ गउड़ वइ एउ, उद्दण्ड-जडज समअ पराउ ।
उरु-विक्कम-विक्कम-जणिअ-जूरु, ताकण परक्कम कोइ ण वुज्झु ॥"

अथो पञ्चमोऽध्यायः ।

---

१ । "गीत्यार्य्या लः ।" पि० ।

"यत्र पादे द्विर्वसवः षोड़श-लकारा भवन्ति, सा गीत्यार्य्या नाम जातिः । ल इत्यनुवर्त्तमाने पुनर्लग्रहणं द्विमात्रिकनिवृत्त्यर्थम् ।" * ह० ।

२ । "शिखा विपर्य्यस्तार्द्धा ।" पि० ।

"यत्रार्द्धं सर्वलघु भवति, अर्द्धञ्च सर्व-गुर्व्विति । एवं तस्या एव विन्यास-भेदेन संज्ञाद्वयमाह ।" ह० ।

३ । "लः पूर्वश्चेज्ज्योतिः ।" पि० ।

"पूर्वश्चेदर्द्धभागः सर्वलघुर्द्वात्रिंशल्लकारो भवति, उत्तरश्च सर्वगुरुः षोड़श-गकारः, तदा ज्योतिर्नाम शिखा भवति ।" ह० ।

४ । "गश्चेत् सौम्या ।" पि० ।

"तस्या एव शिखायाः पूर्वार्द्धभागः सर्वगुरुः षोड़श-गकारश्चेद्भवति, उत्तरश्च द्वात्रिंशल्लकार एव, तदा सौम्या नाम शिखा भवति ।" ह० ।

---

* अस्याम् अचलधृत्याख्यं समवृत्तं गीत्यार्य्याया अभिन्नम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

५ । "अष्टावर्द्धे गा ह्यभ्यस्ता यस्याः सानङ्गक्रीड़ोक्ता ।*
दलमपरमपि वसुगुणित-सलिलनिधि-लघु कविरचित-पदविततिभवति ॥"
कि॰ ।

६ । "चूलिकैकोनत्रिंशदेकत्रिंशदन्ते ग् ।" पि॰ ।

"यत्र प्रथमेऽर्द्धे एकोनत्रिंशल्लकारा भवन्ति, द्वितीये चार्द्धे एकत्रिंशत्, तयोश्च अन्ते द्वौ लकारावुन्मूल्य प्रत्येकमेको गुरुः क्रियते, तच्चूलिका नाम छन्दः । अन्ते गिति विशेषोपादान-सामर्थ्यादन्येषां लघुत्वमुक्तं भवति । तेनाद्ये सप्तविंशतिर्लघवोऽन्ते गुरुरेको भवति । द्वितीयेऽप्येकोनत्रिंशल्लघवोऽन्ते गुरुश्चैकः ।

अन्यैः पुनरन्यथैवेदं सूत्रमधीयते, 'चूलिकार्द्धमेकोनत्रिंशदन्ते गिति ।' तेषामुभयोश्चाप्यर्द्धयोरेकोनत्रिंशन्मात्रा गुर्वन्ता भवन्ति । अर्द्धग्रहणादत्र पादव्यवस्था नास्ति ।" ह॰ ।

७ । "त्रिगुण-नव-लघुरवसिति-गुरुरिति दलयुग(ल)कृत-तनुरतिरुचिरा ।"
कि॰ ।

तारानाथतर्कवाचस्पति-प्रकाशिते पुस्तके नारायणभट्टकृत-टीकायाञ्चायं पाठो दृश्यते । किञ्चाधिकाचरदोष-परिहारार्थं लित्येकाचरोन्मूलनं कर्त्तव्यमित्युपन्यस्तम् ।

इदमर्द्धस्योक्त-लक्षणं 'चूलिकार्द्धमेकोनत्रिंशदन्ते ग' इत्येव पैङ्गलसूत्र-पाठ-सम्मतम् ।

८ । "मात्रात्रयोदशकं यदि, पूर्वं लघुकपरिविरामि ।
पठ पुनरेकादशं दोहड़िका द्विगुणेन ॥ प्राकृतभाषायां प्रचारः ।" ग॰ ।

तारानाथधृतः पाठोऽयं मात्रान्यूनाधिक्यदोषात् परिहार्य्यः, परन्तु रामतारणशिरोमणि-धृतः पाठः समीचीनो मन्यते, तद्यथा—

"मात्रात्रयोदशकं यदि, पूर्वं लघुक-विरामि ।
पश्चादेकादशकन्तु, दोहड़िका द्विगुणेन ॥ अपभ्रंशभाषायां प्रचारः । " ग॰ ।

लघुक-विरामि अन्त्यवर्णौ लघुरिति, पूर्वं प्रथमपादे, पश्चाद्द्वितीयपादे चेत्यर्थः ।

---

* सौम्यात अनङ्गक्रीड़ा-नाम्नीक्ता ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

९। एतदध्यायोक्तजातयो रेखाभिर्दर्श्यन्ते। यथा—

<table>
<tr><th colspan="2" rowspan="2">छन्दोनामानि।</th><th rowspan="2">अर्द्धे</th><th colspan="2">वर्णसंख्याः</th><th rowspan="2">द्व्यर्द्धयोः मात्रासंख्या</th></tr>
<tr><th>लघुः</th><th>गुरुः</th></tr>
<tr><td colspan="2">गीत्यार्य्या</td><td>प्रत्येकं</td><td>३२</td><td>०</td><td>६४</td></tr>
<tr><td rowspan="4">शिखा विपर्यासभेदेन</td><td rowspan="2">ज्योतिः</td><td>आद्ये</td><td>३२</td><td>०</td><td rowspan="2">६४</td></tr>
<tr><td>अन्त्ये</td><td>०</td><td>१६</td></tr>
<tr><td rowspan="2">सौम्या</td><td>आद्ये</td><td>०</td><td>१६</td><td rowspan="2">६४</td></tr>
<tr><td>अन्त्ये</td><td>३२</td><td>०</td></tr>
<tr><td colspan="2" rowspan="2">चूलिका</td><td>आद्ये</td><td>२७</td><td>१*</td><td rowspan="2">६०</td></tr>
<tr><td>अन्त्ये</td><td>२९</td><td>१*</td></tr>
<tr><td colspan="2">अन्या चूलिका</td><td>प्रत्येकं</td><td>२७</td><td>१*</td><td>५८</td></tr>
</table>

*अन्ते।

१०। उदाहरणानि।

१। गीत्यार्य्यायाम्।

"मदकल-खगकुल-कलरव-मुखरिणि, विकसित-सरसिज-परिमल-सुरभिणि।
गिरिवर-परिसर-सरसि महति खलु, रतिरतिशयमिह मम हृदि विलसति॥"

ह०।

२। ज्योतिषि।

"यदि सुखमनुपममपरमभिलषसि, परिहर युवतिषु रतिमतिशयमिह।
आत्मज्योतिर्योगाभ्यासाद्दृष्ट्वा दुःखच्छेदं कुर्य्याः॥" ह०।

३। सौम्यायाम्।

"सौम्यां दृष्टिं देहि स्नेहाद्देहेऽस्माकं मानं मुक्त्वा।
शशधरमुखि सुखमुपनय मम हृदि, मनसिज-रुजमपहर लघुतरमिह॥"

ह०।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

४ । चूलिकायाम् ।

"रतिकर-मलयमरुति शुभशशमभिहत-हिममहसि मधुसमये ।
प्रवससि पथिक विरहित कथमिह तु परिहृत-युवतिरतिचपलतया ॥
घनपरिमल-मिलदलिकुल-मुखरित-निखिल-कमल-मलयपवने ।
जनयति मनसि शशिमुखि सुदमतिशयमिह मम मधुरयमधुना ॥" ह० ।

अथ षष्ठोऽध्यायः ।

१ । कतिचिन्मात्राच्छन्दांसि छन्दोग्रन्थेषु नोक्तानि, पुनस्तानि काव्ये दृश्यन्ते । अतस्तेषां सोदाहरण-लक्षणानि यथामति प्रदर्श्यन्ते ।

एतानि बह्वन्यपराणि च यानि पिङ्गलाचार्येण नामनिर्देशं कृत्वा नोक्तानि, तानि सर्वाण्येव गाथा-शब्देन कथ्यन्ते, यथा—

"अत्रानुक्तं गाथा ।" पि० ।

"अत्र शास्त्रे नामोद्देशेन यन्नोक्तं छन्दःप्रयोगे च दृश्यते तद्गाथेति मन्तव्यम् ।" ह० ।

२ । आद्यार्द्धे विंशतिर्मात्राः, दशमेऽन्ते च यतिः । अन्त्यार्द्धे षोड़श-मात्राश्च ।

यथा, "प्रलय-पयोधि-जले धृतवानसि वेदम् ।
विहित-वहित्र-चरित्रमखेदम् ॥
क्षितिरतिविपुलतरे तव तिष्ठति पृष्ठे ।
धरणिधरणकिण-चक्र-गरिष्ठे ॥" - गी० गो० १स० ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

३ । आद्यार्द्धे विंशतिर्मात्रा एकादशेऽन्ते च यतिः । अन्त्यार्द्धे एकविंशतिर्मात्रा दशमेऽन्ते च यतिः । तत्रोदाहरणम्,

"वहति मलयसमीरे मदनमुपनिधाय ।
स्फुटति कुसुमनिकरे विरहि-हृदय-दलनाय ॥
दहति शिशिर-मयूखे मरणमनुकरोति ।
पतति मदन-विशिखे विलपति विकलतरोऽति ॥" गी० गो० ५स० ।

वक्ष्यमाणेषु भिन्नैव यतिः—

"अमल-कमलदललोचन भवमोचन ए ।
त्रिभुवन-भवन-निधान जय जय देव हरे ॥" गी० गो० १स० ३, ५ ।

४ । उभयार्द्धयोः पञ्चदश मात्रा अन्ते च यतिः । तत्रोदाहरणम्,

"अनिल-तरल-कुवलयनयनेन, तपति न सा किशलयशयनेन ।
सखि या रमिता वनमालिना ॥ ध्रु ।
"विकसित-सरसिज-ललितमुखेन । स्फुटति न सा मनसिज-विशिखेन ॥
अमृतमधुर-मृदुतर-वचनेन । ज्वलति न सा मलयज-पवनेन ॥
स्थलजलरुह-रुचिकर-चरणेन । लुठति न सा हिमकर-किरणेन ॥
*　*　*　*　*
श्रीजयदेव-भणित-वचनेन । प्रविशतु हरिरपि हृदयमनेन ॥"

गी० गो० ७स० ।

५ । उभयार्द्धयोः सप्तदश मात्रा अन्ते च यतिः । तत्रोदाहरणम्,

"प्रविश राधे माधव-समीपमिह । मञ्जुतर-कुञ्जतल-केलिसदने ॥ ध्रु ।
नवभवदशोकदल-शयनसारे । कुसुमचयरचित-शुचि-वासगेहे ॥
चल-मलय-वन-पवन-सुरभि-शीते । वितत-बहुवल्लि-नवपल्लव-घने ॥
विहित-पद्मावती-सुख-समाजे । भणति जयदेव-कविराजराजे ॥"

गी० गो० ११स० ।

६ । उभयार्द्धयोर्विंशतिर्मात्रा अन्ते च यतिः । तत्रोदाहरणम्,

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

"कथित-समयेऽपि हरिरहह न ययौ वनम्।
मम विफलमिदममलरूपमपि यौवनम्॥
यदनुगमनाय निशि गहनमपि शीलितम्।
तेन मम हृदयमिदमसम-शर-कीलितम्॥

* * * *

अहमिह निवसामि नगणितवनवेतसा।
स्मरति मधुसूदनो मामपि न चेतसा॥
हरिचरणशरण-जयदेव-कविभारती।
वसतु हृदि युवतिरिव कोमल-कलावती॥" गी० गो० ७स०।

७। उभयार्द्धयोश्चतुर्व्विंशतिर्मात्रा अन्ते च यतिः। तत्रोदाहरणम्,

"हरि हरि हरि हतादरतया गता सा कुपितेव। ध्रु।
मामियं चलिता विलोक्य वृतं बधूनिचयेन।
सापराधतया मयापि न वारितातिभयेन॥
किं करिष्यति किं वदिष्यति सा चिरं विरहेण।
किं धनेन जनेन किं मम जीवितेन गृहेण॥

* * * *

क्षम्यतामपरं कदापि तवेदृशं न करोमि।
देहि सुन्दरि दर्शनं मम मन्मथेन दुनोमि॥
वर्णितं जयदेवकेन हरेरिदं प्रवणेन।
किन्दुबिल्व-समुद्रसम्भव-रोहिणीरमणेन॥" गी० गो० ३स०।

अर्द्धच्छेदेकपादं गणयेत्ततः सप्तदशाक्षरसमवृत्तं स्यात्, तल्लक्षणं—
रेफतः सगणश्च जौ भगलास्तदाऽमृतवारि इति।

८। उभयार्द्धयोः सप्तविंशतिर्मात्रा अष्टमे षोड़शे अन्ते च यतिः।
तत्रोदाहरणम्,

"समुदित-मदने, रमणीवदने, चुम्बन-वलिताधरे।
मृगमदतिलकं, लिखति सपुलकं, मृगमिव रजनीकरे॥" गी० गो० ७स०।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

९। उभयार्द्धयोरष्टाविंशतिर्मात्रा अष्टमे षोड़शे अन्ते च यतिः। तत्रोदाहरणम्,

"धीरसमीरे, यमुनातीरे, वसति वने वनमाली। ध्रु।
नामसमेतं, कृतसङ्केतं, वादयते मृदुवेणुम्।
बहु मनुते तनु, ते तनुसङ्गत-पवन-चलितमपि रेणुम्॥
पतति पतत्रे, विचलति पत्रे, शङ्कित भवदुपयानम्।
रचयति शयनं, सचकित-नयनं, पश्यति तव पन्थानम्॥
मुखरमधीरं, त्यज मञ्जीरं, रिपुमिव केलिसुलोलम्।
चल सखि कुञ्जं, सतिमिरपुञ्जं, शीलय नीलनिचोलम्॥
* * * *
श्रीजयदेवे, कृतहरिसेवे, भणति परमरमणीयम्।
प्रमुदित-हृदयं, हरिमतिसदयं, नमत सुकृत-कमनीयम्॥"
गी॰ गो॰ ५स॰।

यतिर्विभिन्ना यथा—

"ललितलवङ्गलता-परिशीलन-कोमल-मलय-समीरे।
मधुकर-निकर-करम्बित-कोकिल-कूजित-कुञ्जकुटीरे॥
हरिरिह सरस-वसन्ते, विहरति हरिरिह सरसवसन्ते।
नृत्यति युवतिजनेन समं सखि विरहिजनस्य दुरन्ते॥ ध्रु॰।
उन्मद-मदन-मनोरथ-पथिकबधूजन-जनित-विलापे।
अलिकुल-सङ्कुल-कुसुमसमूह-निराकुल-वकुलकलापे॥
* * * *
श्रीजयदेव-भणितमिदमद्भुत-केशव-केलिरहस्यम्।
वृन्दावन-विपिने ललितं वितनोतु शुभानि यशस्यम्॥" गी॰गो॰ १स॰।

१०। उभयार्द्धयोरूनत्रिंशन्मात्राः। तत्रोदाहरणम्,
"कुरु यदुनन्दन चन्दनशिशिरतरेण करेण पयोधरे।
मृगमदपत्रकमत्र मनोभव-मङ्गल-कलस-सहोदरे॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अलिकुलगञ्जनमञ्जनकं रतिनायक-शायक-मोचने ।
त्वदधर-चुम्बन-लम्बित-कज्जलमुज्ज्वलय प्रिय लोचने ॥
नयन-कुरङ्ग-तरङ्ग-विकाश-निरासकरे श्रुतिमण्डले ।
मनसिज-पाश-विलासधरे शुभवेश निवेशय कुण्डले ॥

* * * *

श्रीजयदेव-वचसि जयदे हृदयं सदयं कुरु मण्डने ।
हरिचरण-स्मरणामृत-कृत-कलिकलुष-ज्वरखण्डने ॥" गी० गो० १२स० ।

११ । उभयार्द्धयोश्चतुस्त्रिंशन्मात्रा दशमे विंशे अन्ते च यतिः । तत्रोदाहरणं गीतगोविन्दे १०म-सर्गे ।*

"प्रिये चारुशीले, प्रिये चारुशीले, मुञ्च मयि मानमनिदानम् ।
सपदि मदनानलो, दहति मम मानसं, देहि मुखकमल-मधुपानम् ॥ ध्रु ।
वदसि यदि किञ्चिदपि, दन्तरुचिकौमुदी, हरति दर-तिमिरमतिघोरम् ।
स्फुरदधर-सीधवे, तव वदनचन्द्रमा, रोचयति लोचन-चकोरम् ॥

* * * * *

स्मर-गरल-खण्डनं, मम शिरसि मण्डनं, देहि पदपल्लवमुदारम् ।
ज्वलति मयि दारुणो, मदन-कदनानलो, हरतु तदुपाहितविकारम् ॥
इति चटुल-चाटुपटु-चारु मुरवैरिणो, राधिकामधि वचनजातम् ।
जयति पद्मावतीरमण-कविभारती, जयदेव-भणितमतिशातम् ॥"

१२ । उभयार्द्धयोः षट्त्रिंशन्मात्राः । तत्रोदाहरणम्, भागवते,

"पादैर्न्यूनं शोचसि मैकपादमुतात्मानं वृषलैर्भोक्ष्यमाणम् ।
आहो सुरादीन् हृतयज्ञभागान्, प्रजा उतस्विन्मघवत्यवर्षति ॥ १।१६।२१।
यस्मिन् हरिर्भगवानिज्यमान, इज्यात्ममूर्त्तिर्यजतां शं तनोति ।
कामानमोघान् स्थिरजङ्गमानामन्तर्वहिर्वायुरिवैष आत्मा ॥" १।१७।३४।

१३ । उभयार्द्धयोरष्टात्रिंशन्मात्राः । तत्रोदाहरणम्, महाभारते,

---

* जयदेवस्य सर्व्वाण्येव गीतानि सुललित-यमकच्छन्दसा रचितानि ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

"यदाश्रौषं मागधानां वरिष्ठं, जरासन्धं चत्र-मध्ये ज्वलन्तम् ।
दोर्भ्यां हतं भीमसेनेन गत्वा, तदा नाशंसे विजयाय सञ्जय ॥
यदाश्रौषमर्ज्जुनं देवदेवं, किरातरूपं त्र्यम्बकं तोष्य युद्धे ।
अवाप्तवन्तं पाशुपतं महास्त्रं, तदा नाशंसे विजयाय सञ्जय ॥"

अथ सप्तमोऽध्यायः ।

१ । अत्र गणमात्राच्छन्दसां गुरुलघुसंख्यानिरूपणं क्रियते ।

२ । "सा ग्येन न समा लां ग्ल इति ।" पि० ।

"'ग्ल' इत्यक्षराण्यभिधीयन्ते, तेषां गुरुलघुरूपत्वात् । अयमभिप्रायः, आर्य्यादिषु शास्त्रे यावत्यो मात्रा उपदिष्टास्तावन्त्यक्षराणि यथासंख्यं न पूर्य्यन्ते, सा तत्र गुरुसंख्या वेदितव्या, अवशिष्टा लघुसंख्या ।" ह० ।

३ । साङ्केतिकव्याख्यया एवं बोध्यव्यम् ।

अक्षराणि = ग्लः = ग् + ल् । मात्रासंख्या = २ग + ल = मा । इत्थं, मा — ग्लः = ग, अपि च ग्लः — ग = ल ।

४ । तत्रोदाहरणं गीतगोविन्दे ७म-सर्गे,

"प्रसरति शशधर-बिम्बे विहितविलम्बे च माधवे विधुरा ।
विरचित-विविधविलापं सा परितापं चकारोच्चैः ॥" २ ।

अत्र द्विचत्वारिंशदक्षराणि वर्त्तन्ते । आर्य्यालक्षणेन तेषां सप्तपञ्चाशत् संख्यका मात्रा भवितव्याः । तेन हि मा = ५७; ग्लः = ४२ । इत्थं ग = ५७—४२ = १५, गुरुसंख्या । अपि च, ल = ४२—१५ = २७, लघुसंख्या । तथा च,

"अभ्युन्नता पुरस्तादवगाढ़ा जघनगौरवात्पश्चात् ।
द्वारेऽस्य पाण्डुसिकते पदपङ्क्तिर्दृश्यतेऽभिनवा ॥"

अत्र सप्तत्रिंशदक्षराणि वर्त्तन्ते । तेन ग्लः = ३७ । ततः ग = ५७—३७ = २०, गुरुसंख्या । अपि च ३७—२० = १७, लघुसंख्येति ।

इति घोषकृते छन्दःसारसंग्रहे जातिभेदो नाम प्रथमोऽंशः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

द्वितीयोऽंशः।

प्रथमोऽध्यायः।

अथ वृत्तम्।

१। "वृत्तम्।" पि०।

"तथा चोक्तम् 'पद्यं चतुष्पदं तच्च वृत्तं जातिरिति द्विधा।' गायत्र्यादौ छन्दसि वर्त्तत इति 'वृत्तम्'। तच्च स्थिरगुरुलघ्वक्षर-विन्यासमिष्यते। पादेन संयोगात् पद्यम्। यथा आर्य्यादिच्छन्दःस्वपि पाद-व्यवस्था नास्तीति पादौ संयुक्तौ, वृत्ते पुनः पृथग्भवत इत्यर्थः। संयोगाभावात्। तथा चोक्तम्, 'एकदेशस्थिता जातिर्वृत्तं गुरु-लघु-स्थितम्' इति।" ह०।

२। "सममर्द्धसमं विषमञ्च।" पि०।

"समसर्व्वावयवत्वात् 'समम्'। यस्य चत्वारः पादा एकलक्षणयुक्तास्तत् 'समं वृत्तम्'। शेषञ्च संज्ञानुरूपमेव। तत्रार्द्धे समे यस्य तत् 'अर्द्धसमम्'। सर्व्वावयवेभ्योऽर्द्धाभ्याञ्च विगतं समं यस्य तत् 'विषमम्'। एवं त्रिप्रकारमपि वृत्तजातमुक्तम्।" ह०।

३। "युक् समं विषमञ्चायुक् स्थानं सद्भिर्निगद्यते।
सममर्द्धसमं वृत्तं विषमञ्च तथापरम्॥
अङ्घ्रयो यस्य चत्वारस्तुल्यलक्षणलक्षिताः।
तच्छन्दःशास्त्रतत्त्वज्ञाः समवृत्तं प्रचक्षते॥
प्रथमाङ्घ्रि-समो यस्य तृतीयश्चरणो भवेत्।
द्वितीयस्तुर्य्यवद्वृत्तं तदर्द्धसममुच्यते॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यस्य पादचतुष्केऽपि लक्ष्म भिन्नं परस्परम् ।
तदाहुर्विषमं वृत्तं छन्दःशास्त्रविशारदाः ॥" के० ।

द्वितीयोऽध्यायः ।

अथ विषमम् ।

१ । "आत्रैष्टुभाच्च यदार्षम् ।" पि० ।

"गायत्र्यादि-त्रिष्टुप्पर्य्यन्तं यदार्षं छन्दोजातं वैदिके व्याख्यातं, लौकिके च तत्तथैव द्रष्टव्यम् । किन्तदार्षम् ? चतुर्विंशत्यक्षरा गायत्री, अष्टाविंशत्यक्षरोष्णिक्, द्वात्रिंशदक्षरानुष्टुप्, षट्त्रिंशदक्षरा बृहती, चत्वारिंशदक्षरा पङ्क्तिः, चतुश्चत्वारिंशदक्षरा त्रिष्टुप् ।" ह० ।

"छन्दोऽत्र लौकिकं स्याच्च आर्षमात्रैष्टुभात् स्मृतम् ।
त्रिष्टुप् पङ्क्तिश्च बृहती अनुष्टुबुष्णिगीरितम् ॥
गायत्री स्यात् सुप्रतिष्ठा प्रतिष्ठा मध्यया सह ।
अत्युक्ता चोक्तया सह एकैकाक्षर-वर्जितम् ॥" इत्यग्निपुराणे, ३३० अ० ।

२ । अनुष्टुबेव बहुल-प्रयोगा । तस्या भेदाः पश्चात् पृथगध्याये ३७ पृष्ठे द्रष्टव्याः । येषामार्षच्छन्दसां लौकिके विरल-प्रयोगो दृश्यते तेषामुदाहरणान्येव अत्रोद्ध्रियन्ते, यथा—

३ । त्रिष्टुभः,

"अमी वेदिं परितः क्लृप्तधिष्ण्याः, समिद्वन्तः प्रान्तसंस्तीर्णदर्भाः ।
अपघ्नन्तो दुरितं हव्यगन्धैर्वैतानास्त्वां वह्नयः पावयन्तु ॥" शकु० ।

तथा च भागवते,

"कच्चिद्भद्रेऽनामयमात्मनस्ते, विच्छायासि म्लायतेषन्मुखेन ।
आलक्षये भवतीमन्तराधिं, दूरे बन्धुं शोचसि कञ्चनाम्ब ॥" १।१६।२०।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

"अरक्ष्यमाणां स्त्रिय उर्व्वि बालान्, शोचस्यथो पुरुषादैरिवार्त्तान्।
वाचं देवीं ब्रह्मकुले कुकर्म्मण्यब्रह्मण्ये राजकुले कुलाग्र्यान् ॥"१।१६।२२।
"महत् सेवां द्वारमाहुर्विमुक्तेस्तमो द्वारं योषितां सङ्गिसङ्गम्।
महान्तस्ते समचित्ताः प्रशान्ता, विमन्यवः सुहृदः साधवो ये ॥" ५।५।२।

तृतीयोऽध्यायः।

अथानुष्टुभ्भेदाः।

१। "पादस्यानुष्टुब्वक्त्रम्। न प्रथमात् स्नौ। द्वितीयचतुर्थयो रश्च। वान्यत्। य चतुर्थात्।" पि०।

"अत्र वक्त्रजातौ पादस्य 'प्रथमात्' वर्णादूर्द्ध्वं सगणनगणौ न कार्य्यौ। द्वितीयचतुर्थयोश्च पादयोः प्रथमादूर्द्ध्वं रेफोऽपि न कर्त्तव्य इत्युपदेशः। सगणनगणाभ्यामन्यत् मगणादि-त्रिकषट्क-मध्ये यत्किञ्चित् त्रिकान्तरं 'वा' कर्त्तव्यम्। पादस्य चतुर्थादक्षरादूर्द्ध्वं यकारः प्रयोक्तव्यः।" ह०।

२। "पथ्या युजो ज्। विपरीतैकीयम्।" पि०।

"अत्र वक्त्रे युजः पादस्य चतुर्थादक्षरादूर्द्ध्वं जकारः प्रयुज्यते, तद्वक्त्रं पथ्या नाम। उक्तलक्षणाद्विपरीतलक्षणा एकीयमते पथ्या भवति।" ह०।

३। "चपलाऽयुजो न्।" पि०।

"अयुक्पादस्य यदा चतुर्थादूर्द्ध्वं नकारो भवति, युक्पादे य एवावतिष्ठते, तदा चपला नाम सानुष्टुब्वक्त्रम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

४। "विपुला युग्लः सप्तमः। सर्व्वतः सैतवस्य। भ्नौ न्तौ च।" पि०।

"विपुला युग्लः सप्तमः सर्वं तत् सैतवस्य च।
भ्नौ न्तौ वा विपुलानेका वक्त्र-जातिः समीरिता।" इत्यग्नि पु०।

"य चतुर्थादित्यनेन सर्व्वत्र यकारे प्राप्ते, यदा युक्पादे सप्तमो वर्णो लघुर्भवति, तदा विपुला नाम। ननु पथ्यालक्षणान्तर्भूतत्वात् पुनरुक्तमेतत्। नैवं विपुलावर्गस्येदानीमारभ्यमाणत्वात्, तद्विनानुपपत्तेः। युक्पादे सप्तमेन लघुनावश्यमेव भवितव्यम्। प्रथम-तृतीययोश्चैतावता यकारस्यापवादः। तथा च वक्ष्यति 'सर्व्वतः' इत्यादि। 'सैतवस्य' आचार्य्यस्य मतेन युक्पादेऽयुक्पादे च सप्तमो लकार एव कर्त्तव्यः।

अयुक्पादे यदा चतुर्थादक्षरात्परतो यकारं बाधित्वा भकार-रेफ-नकार-तकारा विकल्पेन भवन्ति, तदासौ विपुला नाम। चकारात् मकार-सकाराभ्यामपि विपुलोपदिष्टा।

इत्यादयो विपुलाविकल्पाः सङ्कीर्णाश्चानुकोटिशः काव्येषु दृश्यन्ते। सर्व्वासां विपुलानां चतुर्थो वर्णः प्रायेण गुरुर्भवतीत्याम्नायः।" ह०।

५। "वक्त्रं नाद्यान्नसौ स्यातामब्धेर्योऽनुष्टुभि ख्यातम्।
युजोर्जेन सरिद्भर्त्तुः पथ्यावक्त्रं प्रकीर्त्तितम्॥" के०।

केदारभट्टकृते वक्त्रलक्षणे 'द्वितीयचतुर्थयोः पादयोः प्रथमादूर्द्धं रेफोऽपि न कर्त्तव्य' इति पिङ्गल-हलायुधोपदेश उपेक्षितः।

६। "श्लोके षष्ठं गुरु ज्ञेयं सर्व्वत्र लघु पञ्चमम्।
द्विचतुःपादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः॥" श्रु०।

पादानां प्रथमाक्षरात्परतः 'सगणनगणौ न कार्य्यौ, द्वितीयचतुर्थयो रेफोपि न कर्त्तव्य' इति पिङ्गल-हलायुधकृतं वक्त्रलक्षणं श्रुतबोधस्य श्लोकलक्षणे न गृहीतम्। पैङ्गल-पथ्यावक्त्रात् श्रौतबोध-श्लोकस्य अयं प्रभेदः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

७। अथ अनुष्टुभ्भेदाः साङ्केतिक-रेखाभिर्दर्श्यन्ते।

अक्षराणि ८	पादे	१	२	३	४	५	६	७	८
वक्त्रस्य	अयुक्		र्यौ	योः		⏑	—	—	
	युक्		का	द		⏑	—	—	
पथ्यावक्त्रस्य	अयुक्		न	पा		⏑	—	—	
	युक्		णौ	योः		⏑	—	⏑	
चपलायाः	अयुक्	(नोपदिष्टम्)	ग	र्थ	स्व	⏑	⏑	⏑	(नोपदिष्टम्)
	युक्		स	तु		⏑	—	—	
†विपुलायाः	अयुक्*		ण	च		*	*	*	
	युक्		ग	य	र	⏑	—	⏑	
सैतवस्य	अयुक्		न	ती		⏑	—	⏑	
विपुलायाः	युक्			द्वि		⏑	—	⏑	

अनुष्टुभः उदाहरणानि।

१। वक्त्रस्य,

"नवधाराम्बु-संसिक्त-वसुधागन्धि-निःश्वासम्।
किञ्चिदुन्नत-घोणाग्रं, मही कामयते वक्त्रम्॥" हृ०।

तथा च,

"दुर्भाषितेऽपि सौभाग्यं, प्रायः प्रकुरुते प्रीतिः।
मातुर्मनो हरन्त्येव, दौर्लालित्योक्तिभिर्बालाः॥" हृ०।

२। पथ्यावक्त्रस्य, (क)

"नित्यं नीति-निषण्णस्य, राज्ञो राष्ट्रं न सीदति।
न हि पथ्याशिनः काये, जायन्ते व्याधि-वेदनाः॥" हृ०।

---

* भकार-रेफ-नकार-तकार-मकार-सकारा विकल्पेन भवन्ति। सैतवमते जकारः।

† चतुर्थो वर्णः प्रायेण गुरुर्भवति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

एकीयमते च, (ख)

"भर्त्तुराज्ञानुवर्त्तिनी, या स्त्री स्यात् सा स्थिरा लक्ष्मीः ।
स्वप्रभुत्वाभिमानिनी, विपरीता परित्याज्या ॥" ह० ।

अपि च, (क)

"मा निषाद प्रतिष्ठान्त्वमगमः शाश्वतीः समाः ।
यत् क्रौञ्च-मिथुनादेकमवधीः काममोहितम् ॥" रामा० ।
"भवेत् स गुरु-तल्पी च, ब्रह्महा च स वै भवेत् ।
सुरापानं स कुर्य्याच्च, यो हन्याच्छरणागतम् ॥" महाभारतम् ।
"तत् साधुकृत-सन्धानं, प्रतिसंहर सायकम् ।
आर्त्तत्राणाय ते शस्त्रं, न प्रहर्त्तुमनागसि ॥
यदुत्तिष्ठति वर्णेभ्यो, नृपाणां क्षयि तत् फलम् ।
तपःषड्भागमक्षय्यं, ददत्यारण्यका हि नः ॥" शकु० ।
"मृत्युर्जन्मवतां वीर, देहेन सह जायते ।
अद्य वाब्दशतान्ते वा, मृत्युर्वै प्राणिनां ध्रुवः ॥" भागवतम् ।
"दिव्यं चूतरसं पीत्वा, न गर्व्वं याति कोकिलः ।
पीत्वा कर्द्दमपानीयं, भेको मकमकायते ॥" वररुचिः ।
"क्वचिद्रुष्टः क्वचित्तुष्टो, रुष्टस्तुष्टः क्षणे क्षणे ।
अव्यवस्थित-चित्तस्य, प्रसादोऽपि भयङ्करः ॥" घटकर्पैरः ।

३ । चपलावक्त्रस्य,

"क्षीयमाणाग्रदशना, वक्र-निर्म्मांस-नासाग्रा ।
कन्यका वाक्यचपला, भवति धूर्त्त-सौभाग्यम् ॥" ह० ।

४ । विपुलावक्त्रस्य, (क) सैतवमते,

"सैतवेन पथार्णवं, तीर्णो दशरथात्मजः ।
रक्षःक्षयकरीं पुनः, प्रतिज्ञां स्वेन बाहुना ॥" इ० ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तथा च मन्त्र-ब्राह्मणे, १म प्रपाठके,

"यदेतद्धृदयं तव, तदस्तु हृदयं मम।
यदिदं हृदयं मम, तदस्तु हृदयं तव॥" ३ख० ९।
"अग्निष्टे हस्तमग्रहीत्, सविता हस्तमग्रहीत्।
अर्यमा हस्तमग्रहीन्मित्रस्त्वमसि कर्मणा॥" ६ ख० १५।

(ख) भकारेण,

"इयं सखे चन्द्रमुखी, स्मित-ज्योत्स्ना च मानिनी।
इन्दीवराक्षी हृदयं, दन्दहीति तथापि मे॥
वटे वटे वैश्रवणश्चत्वरे चत्वरे शिवः।
पर्वते पर्वते रामः, सर्वत्र मधुसूदनः॥
देवः स जयति श्रीमान्, दण्डधारी महीपतिः।
यस्य प्रसादाद्भुवनं, शाश्वते पथि तिष्ठति॥" ह०।
"स सत्यवचनाद्राजा, धर्म्म-पाशेन संयतः।
विवासयामास सुतं, रामं दशरथः प्रियम्॥" रामा०।
"एतावदुक्त्वा स तदा, तूष्णीमासीद्भृगूत्तमः।
अथ सूर्य्योऽददत्तस्मै, छत्रोपानहमाशु वै॥" महाभारतम्।
"यथा वशिष्ठाङ्गिरसावृषी प्राचेतसस्तथा।
जनकानां रघूणाञ्च वंशयोरुभयोर्गुरुः॥" उत्तरचरितम्।
"हतस्त्वं पात्रसमितैः, खट्वारूढः प्रमादवान्।
पानशौण्डः श्रियं नेता, नात्यन्तीनत्वमुन्मनाः॥" भट्टिकाव्यम्।
"विराद्ध एवं भवता, विराद्धा बहुधा च नः।
निर्वर्त्त्यतेऽरिः क्रियया, सः श्रुतश्रवसः सुतः॥" माघः।

(ग) रेफेण,

"लक्ष्मी-पतिं लोकनाथं, रथाङ्गधरमीश्वरम्।
यज्ञेश्वरं शार्ङ्गपाणिं, प्रणमामि त्रयीं तनुम्॥

६

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कामिनीभिः सह प्रीतिः, कस्मै नाम न रोचते।
यदि न स्याद्वारि-वीचि-चञ्चलं हत-जीवितम्॥" ह०।
"न केवलं श्राद्धकृत्ये, पुण्यकेष्वपि दीयते।
बहुष्वपि निमित्तेषु, पुण्यमाश्रित्य दीयते॥" महाभारतम्।
"प्रियव्रतोत्तानपादौ, मनोः स्वायम्भुवस्य तु।
द्वौ पुत्रौ सुमहावीर्य्यौ, धर्म्मज्ञौ कथितौ तव॥" विष्णुपु०।
"सावर्णिना नारदाय, ब्रह्मवैवर्त्तमीरितम्।
रथान्तरस्य वृत्तान्तमष्टादश-सहस्रकम्॥" अग्निपु०,२७१।१२।

(घ) नकारेण,

"तपःस्वाध्याय-निरतं, तपस्वी वाग्विदां वरम्।
नारदं परिपप्रच्छ, वाल्मीकिर्मुनिपुङ्गवम्॥" रामा०।
"ततोऽन्नं जायते विप्र, मनुष्याणां सुखावहम्।
अन्नं प्राणा इति यथा, वेदेषु परिपठ्यते॥" म० भा०।
"का कथा बाणसन्धाने, ज्या-शब्देनैव दूरतः।
हुङ्कारेणेव धनुषः, स हि विघ्नानपोहति॥" शकु०।
"ब्रह्म-हत्या-प्रशमनं, सोम-याग-फलं मुने।
वर्षं सोमलता-पानं, यजमानः करोति हि॥" ब्रह्मवै०।
"गर्ब्भ-प्रच्युति-दोषेण, प्रोत्तुङ्गाक्रमणेन च।
मैत्रेय सापि हरिणी, पपात च ममार च॥" विष्णुपु०।
"जगृहे पौरुषं रूपं भगवान् महदादिभिः।
सम्भूतं षोड़शकलमादौ लोक-सिसृक्षया॥" भागवतम्।
"पूरोत्पीड़े तड़ागस्य, परीवाहः प्रतिक्रिया।
शोके क्षोभे च हृदयं, प्रलापैरेव धार्य्यते॥" उ० च०।
"पुरो रामस्य जुहवाञ्चकार ज्वलने वपुः।
शरभङ्गः प्रदिश्यारात्, सुतीक्ष्ण-मुनिकेतनम्॥" भट्टि०।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

"सम्भाव्य त्वामतिभर-क्षमस्कन्धं स बान्धवः ।
सहायमध्वरधुरां, धर्म्मराजो विवक्षते ॥" माघः ।

(ङ) तकारेण,

"वन्दे देवं सोमेश्वरं, जटामुकुटमण्डितम् ।
खट्वाङ्गधरं चन्द्रमःशिखामणि-विभूषितम् ॥
वन्दे कविं श्रीभारविं, लोकसन्तमसच्छिदम् ।
दिवादीपा इवाभान्ति, यस्याग्रे कवयोऽपरे ॥
लोकवत् प्रतिपत्तव्यो, लौकिकोऽर्थः परीक्षकैः ।
लोकव्यवहारं प्रति, सदृशौ बालपण्डितौ ॥" ह० ।
"अब्रह्मचारी ब्रह्मचार्य्यस्नातः स्नातको भवेत् ।
हैमी वा मुद्रिका धार्य्या, शिवमन्त्रेण चार्च्चतु ॥" अग्निपु० ३२४।३।

(च) मकारेण,

"अथान्तरीक्षे वागुच्चैरुवाचामानुषी किल ।
प्राप्स्यस्यपत्यमस्यास्त्वं, सदृशं रूपवर्च्चसा ॥" रामा० ।
"असंशयं मां विप्रर्षे, वेत्सग्रसे धन्विनां वर ।
अवशं विनयाधानं, कार्य्यमद्य मया तव ॥" म० भा० ।
"महाराजश्च देवो वा, यागं कर्त्तुमलं मुने ।
न सर्व्वसाध्यो यज्ञोऽयं, बह्वन्नो बहुदक्षिणः ॥" ब्रह्मवै० ।
"किं वृकैर्भक्षितो व्याघ्रैः, किं सिंहेन निपातितः ।
चिरायमाणे निष्क्रान्ते, तस्यासीदिति मानसम् ॥" विष्णुपु० ।
"ब्राह्मणाश्चैव गावश्च, कुलमेकं द्विधा कृतम् ।
एकत्र मन्त्रास्तिष्ठन्ति, हविरेकत्र तिष्ठति ॥" अग्निपु०,२९१।२०।
"इदं गुरुभ्यः पूर्व्वेभ्यो, नमोवाकं प्रशास्महे ।
विन्देम देवतां वाचममृतामात्मनः कलाम् ॥" उ० च० ।
"अटाट्यमानोऽरण्यानीं, ससीतः सहलक्ष्मणः ।
बलाद्बुभुक्षुणोत्क्षिप्य, जज्ञे भीमेन रक्षसा ॥" भट्टि० ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

"सखा गरीयान् शत्रुश्च, कृत्रिमस्तौ हि कार्य्यतः ।
स्याताममित्रौ मित्रे च, सहज-प्राकृतावपि ॥" माघः ।

(छ) सकारेण,

"जिते तु लभते लक्ष्मीं, मृते चापि वराङ्गनाः ।
क्षणविध्वंसिनि काये का चिन्ता मरणे रणे ॥" ह० ।
"स्वागतं स्वानधिकारान्, प्रभावैरवलम्ब्य वः ।
युगपद्युग-बाहुभ्यः, प्राप्तेभ्यः प्राज्यविक्रमाः ॥" कु० स० ।
"तच्च द्वादशसाहस्रं, ब्रह्माण्डं तद्विजेऽर्पयेत् ।
भारते पर्व्वसमाप्तौ, वस्त्र-गन्ध-स्रगादिभिः ॥" अग्निपु०, २७१।२३।

(ज) सङ्कीर्णायाश्च,

"क्वचित्काले प्रसरता, क्वचिदापत्य विघ्नता ।
शुनेव सारङ्गकुलं, त्वया भिन्नं द्विषां कुलम् ॥" भारविः ।
"उत्तिष्ठमानस्तु परो, नोपेक्ष्यः पथ्यमिच्छता ।
समौ हि शिष्टैराम्नातौ, वर्त्स्यन्तावामयः स च ॥
ततः सपत्नापनयस्मरणानुशयस्फुरा ।
श्रोष्ठेन रामो रामौष्ठबिम्ब-चुम्बन-चुञ्चुना ॥
हते हिड़िम्बरिपुणा, राज्ञि द्वैमातुरे युधि ।
चिरस्य मित्रव्यसनी, सुदमो दमघोषजः ॥
ककुद्मिकन्यावक्त्रान्तर्वासलब्धाधिवासया ।
मुखामोदं मदिरया, कृतानुव्याधमुद्वमन् ॥
यातव्यपार्ष्णिग्राहादि-मालायामधिकद्युतिः ।
एकार्थतन्तुप्रोतायां नायको नायकायते ॥" माघः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अथ चतुर्थोऽध्यायः ।

—oo—

१ । "प्रतिपादं चतुर्वृद्ध्या पदचतुरूर्द्ध्वम्" । पि० ।

"अनुष्टुभः पादादूर्द्ध्वं प्रतिपादं चतुरक्षरवृद्ध्या यद्वृत्तं निष्पद्यते, तत् पदचतुरूर्द्ध्वं नाम । अत्र गुरुलघुविभागो नेष्यते ।" ह० ।

२ । "गावन्त आपीड़ः ।" पि० ।

"गकारौ द्वावन्ते चेद्भवतश्चतुर्णामपि पादानां, तत्पदचतुरूर्द्ध्वमापीड़संज्ञकं भवति । अन्ते गुरुद्वयग्रहणादत्र शेषाणां लघुत्वमभ्यनुज्ञातं सूत्रकारेणेति मन्यामहे ।" ह० ।

३ । "आदौ चेत् प्रत्यापीड़ः । प्रत्यापीड़ो गावादौ च ।" पि० ।

"गकारौ द्वौ आदौ चेद्भवतश्चतुर्णां पादानां, तदा तत्पदचतुरूर्द्ध्वं प्रत्यापीड़संज्ञं भवति । तस्यैव पदचतुरूर्द्ध्वस्यान्ते आदौ च यदि गकारौ भवतस्तदा प्रत्यापीड़ एव भवति । तदेवं द्विप्रकारः प्रत्यापीड़ो भवति । अत्रापि पूर्व्ववत् शेषाणां लघुत्वमेव ।" ह० ।

४ । "प्रथमस्य विपर्य्यासे मञ्जरी*लवल्यमृतधाराः ।" पि० ।

"आपीड़ग्रहणं निवृत्तम् । तेनैव समं लघ्वक्षराभ्यनुज्ञानञ्च । तदेव पदचतुरूर्द्ध्वं प्रथमस्य पादस्य द्वितीयेन विपर्य्यासे मञ्जरी, तृतीयेन विपर्य्यासे

* वृत्तरत्नाकरे मञ्जरी कलिकानाम्नोक्ता ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

लवली, चतुर्थेन विपर्य्यासेऽमृतधारा । केचिदापीड़ादिष्वपि पादविपर्य्यासे सति मञ्जर्य्यादिनामानि इच्छन्ति ।" ह० ।

५ । अत सङ्केतेनैतेषां वर्णसंख्या लघु-गुरु-संख्या च दर्श्यते ।

वृत्तनामानि	पादे अक्षराणि					
	१मे	२ये	३ये	४र्थे		
१ पदचतुरूर्द्धम्	८	१२	१६	२०	प्रथमस्य	
२ मञ्जरी	१२	८	१६	२०	२येन	विपर्य्यासे
३ लवली	१६	१२	८	२०	३येन	
४ अमृतधारा	२०	१२	१६	८ *	४र्थेन	
५ आपीड़:	६	१०	१४	१८	अन्ते	गुरुद्वयम्
६ प्रत्यापीड़: (क)	६	१०	१४	१८	आदौ	
(ख)	४	८	१२	१६	अन्ते आदौ च	

* लघ्वक्षराणि ।

६ । अत्रोद्धृतोदाहरणानि एकादिसंख्याक्रमेण बोध्यव्यानि ।

(१) "तस्याः कटाक्षविक्षेपैः, कम्पिततनुकुटिलैरतिदीर्घैः ।
तक्षकदष्ट इवेन्द्रियशून्यः क्षतचैतन्यः,
पदचतुरूर्द्ध्वं न चलति पुरुषः पतति सहसैव ॥" ह० ।

(२) "जनयति महतीं प्रीतिं हृदये, कामिनां चूतमञ्जरी ।
मिलदलिचक्रचञ्चुपरिचुम्बितकेसरा,
कोमल-मलयवात-परिनर्त्तित-तरुशिखरस्थिता ॥" ह० ।

(३) "विरहविधुर-तरुणाङ्गना-कपोलोपमं, परिणतिधरं पीतपाण्डुच्छवि ।
लवलीफलं निदाघे,
भवति जगति हिमकर-शीतलमतिस्वादूष्णहरम् ॥" ह० ।

(४) "परिवाञ्छसि कर्णरसायनं सततममृतधाराभिः,
यदि हृदि वा परमानन्दरसम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

चेतः शृणु धरणीधरवाणीममृतमयीं, तत्काव्यगुणभूषणम् ॥" ह० ।

पूर्व्वोक्ते श्लोकचतुष्टये गुरुलघुविभागो नेष्यते ।

(५) "कुसुमित-सहकारे, हत-हिम-महिम-शुचि-शशाङ्के ।
विकसित-कमल-सरसि मधुसमयेऽस्मिन्,
प्रवससि पथिक हतक यदि भवति तव विपत्तिः ॥" ह० ।

(६, क) "चित्तं मम रमयति, कान्तं वनमिदमुपगिरिनदि ।
कूजन्मधुकर-कलरवकृत-जनधृति,
पुंस्कोकिल-मुखरित-सुरभिकुसुमचिततरुतति ॥" ह० ।

(६, ख) "कान्तावदनसरोजं, हृद्यं घनसुरभि-मधु-रसाढ्यम् ।
पातुं रहसि सततमभिलषति मनो मे,
किञ्चिन्मुकुलित-नयनमविरतमणितरमणीयम् ॥" ह० ।

अथ पञ्चमोऽध्यायः ।

—oo—

१ । "उद्गतामेकतः स्जौ स्लौ, न्सौ ज्गौ, भ्नौ ज्लौग्, स्जौ स्जौ ग् ।" पि० ।

"यत्र प्रथमे पादे सकार-जकार-सकार-लकारैर्दशाक्षराणि भवन्ति, द्वितीये नकार-सकार-जकार-गकारैर्दशैव, तृतीये भकार-नकार-जकार-लकार-गकारैरेकादशैव, चतुर्थे पादे सकार-जकार-सकार-जकार-गकारैस्त्रयोदशैव, तद्वृत्तमुद्गता नाम ।" ह० ।

उत्तरत्नाकरस्य "तज्झ्रिगत-भनजला गयुताः" इत्येकादशाक्षरं तृतीयपादलक्षणं पिङ्गलसम्मतम् । नैवं

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

छन्दोमञ्जर्य्यां "यद्यथ भनभगाः सुरथी" इति दशाक्षरं लक्षणमतो भ्रान्तमिदं वक्तव्यम्, उत उद्गता द्विप्रकारा इति । 'यद्यथ भनलभगाः सुरथी' इति पाठग्रहणे तु सामञ्जस्यभवेत् ।

२ । "तृतीयस्य सौरभकं नौं भगौ । ललितं नौ सौ ।" पि० ।

"उद्गतायास्तृतीये पादे तु विशेषः, रेफ-नकार-भकार-गकारैर्दशाक्षराणि यदा भवन्ति तदा सौरभकं नाम, यदा नौ सौ भवतस्तदा ललितं नाम वृत्तम् ।" ह० ।

३ । उपस्थितप्रचुपितं पृथगाद्यं म्सौ ज्भौ गौ, स्नौ ज्रौ ग्, नौ स्, नौ न् ज्यौ । वर्द्धमानं नौ स्नौ न्सौ । शुद्ध-विराडृषभं त्ज्रः ।" पि० ।

"यत्र प्रथमे पादे मकार-सकार-जकार-भकारा गकारौ च भवतः, द्वितीये सकार-नकार-जकार-रेफा गकारश्च, तृतीये नकारौ सकारश्च, चतुर्थे त्रयो नकारा जकार-यकारौ च, तदुपस्थितप्रचुपितं नाम वृत्तं भवति । तृतीयस्य पादस्य स्थाने यदा नकारौ सकार-नकारौ पुनर्नकार-सकारौ च भवतस्तदा वर्द्धमानं नाम वृत्तं भवति, यदा तकार-जकार-रेफा भवन्ति तदा शुद्धविराडृषभं नाम वृत्तं भवति ।" ह० ।

४ । एतद्वृत्त-लक्षणानि साङ्केतिक-रेखाभिर्दर्श्यन्ते ।

	पादे	अक्षराणि ।												
(क) उद्गतायाः	१मे	⏑	⏑	—	⏑	—	⏑	⏑	⏑	—	⏑			
	२ये	⏑	⏑	⏑	⏑	⏑	—	⏑	—	⏑	—			
	३ये	—	⏑	⏑	⏑	⏑	⏑	⏑	—	⏑	⏑	—		
	४र्थे	⏑	⏑	—	⏑	—	⏑	⏑	⏑	—	⏑	—	⏑	—
(ख) सौरभकस्य	३ये	—	⏑	—	⏑	⏑	⏑	—	⏑	⏑	—			
(ग) ललितस्य	३ये	⏑	⏑	⏑	⏑	⏑	⏑	⏑	⏑	—	⏑	⏑	—	

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

	पादे	अक्षराणि ।																	
(च) उपस्थित-प्रचुपितस्य	१मे	—	—	—	⏑	⏑	—	⏑	—	⏑	—	⏑	⏑	—	—				
	२ये	⏑	⏑	—	⏑	⏑	⏑	⏑	—	⏑	—	⏑	—	—					
	३ये	⏑	⏑	⏑	⏑	⏑	⏑	⏑	⏑	—									
	४र्थे	⏑	⏑	⏑	⏑	⏑	⏑	⏑	⏑	⏑	⏑	—	⏑	⏑	—	—			
(छ) वर्द्धमानस्य	३ये	⏑	⏑	⏑	⏑	⏑	⏑	⏑	⏑	—	⏑	⏑	⏑	⏑	⏑	⏑	⏑	⏑	—
(ज) शुद्धविराडृषभस्य	३ये	—	—	⏑	⏑	—	⏑	—	⏑	—									

५। अत्रोद्धृतोदाहरणानि क-ख-ग-च-छ-ज-इति वर्णक्रमेण बोद्धव्यानि ।

(क) "अथ तत्र पाण्डुतनयेन, सदसि विहितम्मधुद्विषः ।
मानमसहत न चेदिपतिः, परवृद्धिमत्सरि मनो हि मानिनाम् ॥"

माघः ।

"मृगलोचना शशिमुखी च, रुचिरदशना नितम्बिनी ।
हंसललितगमना ललना, परिणीयते यदि भवेत्कुलोन्नता ॥" ह० ।

(ख) "विनिवारितोऽपि नयनेन, तदपि किमिहागतो भवान् ।
एतदेव तव सौरभकं, यदुदीरितार्थमपि नाववुध्यते ॥" ह० ।

(ग) "सततं प्रियंवदमनून-ममलहृदयं गुणोत्तरम् ।
सुललितमतिकमनीयतनुं, पुरुषं त्यजन्ति न तु जातु योषितः ॥" ह० ।

(च) "रामाकामकरेणुका मृगायतनेत्रा, हृदयं हरति पयोधरावनम्रा ।
इयमतिशयसुभगा, बहुविध-निधुवनकुशला ललिताङ्गी ॥" ह० ।

(छ) "विम्बोष्ठी कठिनोन्नतस्तनावनताङ्गी, हरिणीशिशुनयना नितम्बगुर्व्वी ।
मदकलकरिगमना परिणतशशिवदना,
जनयति मम मनसि मुदं मदिराची ॥" ह० ।

(ज) "कन्येयं कनकोज्ज्वला मनोहरदीप्तिः, शशिनिर्म्मलवदना विशालनेत्रा ।
पीनोरुनितम्बशालिनी, सुखयति हृदयमतिशयं तरुणानाम् ॥" ह० ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

षष्ठोऽध्यायः ।

अथार्द्धसमवृत्तम् ।

१ । "अयुजोर्यदि सौ जगौ युजोः, सभरा ल्गौ यदि सुन्दरी तदा ।" ग० ।
"विषमे ससजा गुरुः समे, सभरा लोऽथ गुरुर्वियोगिनी" इति मल्लिनाथः ।

२ । "वेगवती सौ स्गौ, भौ भ्गौ ग् ।" पि० ।
"विषमे प्रथमाक्षरहीनं, दोधकमेव हि वेगवती स्यात् ।" ग० ।
"स्युगात् सगुरू विषमे चेद्भाविह वेगवती युजि भाद्गौ ।" के० ।

३ । "भद्रविराट् त्जौ ग्गौं, म्सौ ज्गौ ग् ।" पि० ।
"ओजे तपरौ जरौ गुरुश्चेन्-म्सौ ज्गौ ग्भद्रविराड्भवेदनोजे ।" के० ।
"औपच्छन्दसकान्तःपातित्वेऽपि विशेषसंज्ञार्थमर्द्धसमाधिकारे पाठः ।" हृ० ।

४ । "केतुमती स्जौ स्गौ, भ्रौ न्गौ ग् ।" पि० ।
"असमे सजौ सगुरुयुक्तौ, केतुमती समे भरनगाद्गः ।" के० ।

५ । "उपचित्रकं सौ स्लौ ग्, भौ भ्गौ ग् ।" पि० ।
"विषमे यदि सौ सलगा दले, भौ युजि भाद्गुरुकावुपचित्रम् ।" के० ।

६ । "आख्यानिकी तौ ज्गौ ग्, ज्तौ ज्गौ ग् ।" पि० ।
"आख्यानिकी वार्त्ताहारिकोच्यते ।" हृ० ।
(क) "आख्यानकी सा प्रकटी-कृतार्थे, यदीन्द्रवज्राचरणः पुरस्तात् ।
उपेन्द्रवज्राचरणास्त्रयोऽन्ये, मनीषिणोक्ता विपरीतपूर्व्वा ॥" श्रु० ।
(ख) "आख्यानकी तौ जगुरू ग ओजे, जतावनोजे जगुरू गुरुश्चेत् ।
जतौ जगौ गो विषमे समे चेत्, तौ ज्गौ ग एषा विपरीतपूर्व्वा ।" के० ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

७। "विपरीताख्यानिकी ज्तौ ज्गौ ग्, तौ ज्गौ ग्।"* पि०।

८। "द्रुतमध्या भौ भ्गौ ग्, न्जौ ज्यौ।" पि०।

"भत्रयमोजगतं गुरुणी चेद्, युजि च नजौ ज्ययुतौ द्रुतमध्या।" के०।

उपचित्रान्तर्गतेयमयुक्पादौ पुनस्त्रिष्टुभौ दोधक-लक्षणभाजौ, युक्पादौ जगत्यास्तामरसलक्षणभाजौ च।

९। "हरिणप्लुता सौ स्लौ ग्, न्भौ भ्रौ।" पि०।

"सौ सलौ गथ नो भो भ्रौ भवेद् हरिणवल्लभा।" इत्यग्निपुराणे।

"सयुगात्सलघू विषमे गुरुर्युजि नभौ भरकौ हरिणप्लुता।" के०।

"प्रथमाक्षरमाद्यतृतीययोर्द्रुतविलम्बितकस्य हि पादयोः।
यदि नास्ति तदा कमलेक्षणे, भवति सुन्दरि सा हरिणप्लुता॥" श्रु०।

१०। "अपरवक्त्रं नौ र्लौ ग्, न्जौ ज्रौ।" पि०।

"अयुजि ननरला गुरुः समे, न्जमपरवक्त्रमिदं ततो जरौ।" के०।

"अस्य वैतालीयान्तर्गतत्वेऽपि विशेषसंज्ञार्थमिहोपन्यासः।" हृ०।

११। "विषमे ससजा यदा गुरू चेत्सभरा येन तु मालभारिणीयम्।" परि०।

१२। "अयुजि ननभभाः समकेऽपि तु, नयुगरयुगलन्तदा कौमुदी।" परि०।

१३। "पुष्पिताग्रा नौ र्यौ, न्जौ ज्रौ ग्।" पि०।

"अयुजि नयुगरेफतो यकारो, युजि च नजौ जरगाश्च पुष्पिताग्रा।" के०।

---

* आख्यानिक्यः पुनः इन्द्रवज्रोपेन्द्रवज्रोपजातिप्रकरणे नामान्तरेण वेदितव्याः। परन्तु आख्यानिकी पिङ्गलस्य केदारभट्टस्य च इ-उ-इ-उ-इति चतुर्भिः पादैः, श्रुतबोधस्य तु इ-उ-उ-उ-इत्येतैः। विपरीताख्यानिकी पिङ्गल-केदारभट्टयोः उ-इ-उ-इ-इति पादचतुष्टयैः, श्रुतबोधस्य तु उ-इ-इ-इ-इत्येतैः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

"इयमप्यौपच्छन्दसकान्तर्गता ।" ह० ।

१४ । "यवमती जौं जौं, ज्रौ ज्रौ ग् ।"* पि० ।

"यवान्विता यवमतीत्यर्थः ।" ह० ।

१५ । "स्यादयुग्मके रजौ रयौ समे चेत्,
जरौ जरौ गुरुर्यवात्परामतीयम् ।"* के० ।

१६ । "यदि विषमे भवतो नजौ जरौ,
सजयाः समे जगुरू मञ्जुसौरभम् ।"† परि० ।

१७ । एतद्वृत्तानां सुन्दर्य्यपरवक्त्रे द्वे वैतालीयान्तर्गते, भद्रविराण्मालभारिणीपुष्पिताग्रा औपच्छन्दसकान्तर्गता, वेगवती आपातलिकान्तर्गता चेति ।

१८ । अत्रार्द्धसमवृत्तलक्षणानि रेखाभिः प्रदर्श्यन्ते ।

---

* अयुजि अन्त्यलघुः पिङ्गलस्य, अन्त्यगुरुः केदारभट्टस्य इत्येव भेदो दृश्यते ।

† अत्र नारायणभट्टधृतः पाठोऽवलम्बितः । श्रीमता तारानाथतर्कवाचस्पतिना रामतारणशिरोमणिना च धृतः पाठः 'समे तु जगुरुः' इत्यधिकाक्षरदोषेण ह्युपेक्षितः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वृत्तनामानि ।	पादे	अक्षराणि ।												
१ । सुन्दरी ।	अयुक्	⏑	⏑	—	⏑	⏑	—	⏑	—	⏑	—			
	युक्	⏑	⏑	—	—	⏑	⏑	—	⏑	—	⏑	—		
२ । वेगवती	अ०	⏑	⏑	—	⏑	⏑	—	⏑	⏑	—	—			
	यु०	—	⏑	⏑	—	⏑	⏑	—	⏑	⏑	—	—		
३ । भद्रविराट्	अ०	—	—	⏑	⏑	—	⏑	—	⏑	—	—			
	यु०	—	—	—	⏑	⏑	—	⏑	—	⏑	—	—		
४ । केतुमती	अ०	⏑	⏑	—	⏑	—	⏑	⏑	⏑	—	—			
	यु०	—	⏑	⏑	—	⏑	—	⏑	⏑	⏑	—	—		
५ । उपचित्रकम्	अ०	⏑	⏑	—	⏑	⏑	—	⏑	⏑	—	⏑	—		
	यु०	—	⏑	⏑	—	⏑	⏑	—	⏑	⏑	—	—		
६ । आख्यानिकी (पि०)	अ०	—	—	⏑	—	—	⏑	⏑	—	⏑	—	—		
	यु०	⏑	—	⏑	—	—	⏑	⏑	—	⏑	—	—		
७ । विपरीताख्यानिकी (पि०)	अ०	⏑	—	⏑	—	—	⏑	⏑	—	⏑	—	—		
	यु०	—	—	⏑	—	—	⏑	⏑	—	⏑	—	—		
८ । द्रुतमध्या	अ०	—	⏑	⏑	—	⏑	⏑	—	⏑	⏑	—	—		
	यु०	⏑	⏑	⏑	⏑	—	⏑	⏑	—	⏑	⏑	—	—	
९ । हरिणप्लुता	अ०	⏑	⏑	—	⏑	⏑	—	⏑	⏑	—	⏑	—		
	यु०	⏑	⏑	⏑	—	⏑	⏑	—	⏑	⏑	—	⏑	—	
१० । अपरवक्त्रम्	अ०	⏑	⏑	⏑	⏑	⏑	⏑	—	⏑	—	⏑	—		
	यु०	⏑	⏑	⏑	⏑	—	⏑	⏑	—	⏑	—	⏑	—	
११ । मालभारिणी	अ०	⏑	⏑	—	⏑	⏑	—	⏑	—	⏑	—	—		
	यु०	⏑	⏑	—	—	⏑	⏑	—	⏑	—	⏑	—	—	
१२ । कौमुदी	अ०	⏑	⏑	⏑	⏑	⏑	⏑	—	⏑	⏑	—	⏑	⏑	
	यु०	⏑	⏑	⏑	⏑	⏑	⏑	—	⏑	—	—	⏑	—	
१३ । पुष्पिताग्रा	अ०	⏑	⏑	⏑	⏑	⏑	⏑	—	⏑	—	⏑	—	—	
	यु०	⏑	⏑	⏑	⏑	—	⏑	⏑	—	⏑	—	⏑	—	—
१४ । यवमती (पि०)	अ०	—	⏑	—	⏑	—	⏑	—	⏑	—	⏑	—	⏑	
	यु०	⏑	—	⏑	—	⏑	—	⏑	—	⏑	—	⏑	—	—
१५ । यवमती (के०)	अ०	—	⏑	—	⏑	—	⏑	—	⏑	—	⏑	—	—	
	यु०	⏑	—	⏑	—	⏑	—	⏑	—	⏑	—	⏑	—	—
१६ । मञ्जुसौरभम् ।	अ०	⏑	⏑	⏑	⏑	—	⏑	⏑	—	⏑	—	⏑	—	⏑
	यु०	⏑	⏑	—	⏑	—	⏑	⏑	—	—	⏑	—	⏑	—

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

१८। अर्द्धसमवृत्तानामुदाहरणानि। (१) सुन्दर्य्याः,

"किमिवाखिल-लोक-कीर्त्तितं, कथयत्यात्मगुणं बुधो जनः ।
वदितास्ति न यस्य कश्चन, स्वगुणं तेन वदत्यसौ स्वयम् ॥" माघे १६।३१।

(२) वेगवत्याः,

"तव पुञ्ज-नराधिप सेनां, वेगवतीं सहते समरेषु ।
प्रलयोर्म्मिमिवाभिमुखीं तां, कः सकलक्षितिभृन्निवहेषु ॥" ह० ।

(३) भद्रविराजः,

"यत्पादतले चकास्ति चक्रं, हस्ते वा कुलिशं सरोरुहं वा ।
राजा जगदेकचक्रवर्त्ती, स्याच्छं भद्रविराट् समस्रुतेऽसौ ॥" ह० ।

(४) केतुमत्याः,

"हृतभूरिभूमिपतिचिह्नां, युद्धसहस्रलब्धजयलक्ष्मीम् ।
सहते न कोऽपि वसुधायां, केतुमतीं नरेन्द्र तव सेनाम् ॥" ह० ।

(५) उपचित्रकस्य,

"उपचित्रकमत्र विराजते, चूतवनं कुसुमैर्विकसद्भिः ।
परपुष्टविघुष्टमनोहरं, मन्मथकेलिनिकेतनमेतत् ॥" ह० ।

(६) आख्यानिक्याः (पि०), कुमारसम्भवे, माघे च,

इ "वर्णप्रकर्षे सति कर्णिकारं, दुनोति निर्गन्धतया स्म चेतः । उ
इ प्रायेण सामग्र्यविधौ गुणानां, पराङ्मुखी विश्वसृजः प्रवृत्तिः ॥" उ
इ "यामूढ़वानूढ़वराहमूर्त्तिः, मुहूर्त्तमादौ पुरुषः पुराणः । उ
इ तेनोह्यते साम्प्रतमक्षतेव, क्षतारिणा सम्यगसौ पुनर्भूः ॥" उ

(क) तथा कुमारसम्भवे आख्यानक्याः, श्रु० ।

इ "एकैव सत्यामपि पुत्रपङ्क्तौ, चिरेण दृष्टेव मृतोत्थितेव । उ
उ उपोढ़पाणिग्रहणेति पित्रोः, उमा विशेषोच्छ्वसितं बभूव ॥" इ

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

विपरीताख्यानक्याश्च (शु०), कुमारसम्भवे, ७।२३।

उ “अथाङ्गुलीभ्यां हरितालमार्द्रं, माङ्गल्यमादाय मनःशिलाञ्च । इ

इ कर्णावसक्तामलदन्तपत्रं, माता तदीयं मुखमुन्नमय्य ॥” इ

(७) विपरीताख्यानिक्याः (पि०), कुमारसम्भवे, ७।६४।

उ “तमेकदृश्यं नयनैः पिबन्त्यो, नार्य्यो न जग्मुर्विषयान्तराणि ।इ

उ तथाहि शेषेन्द्रियवृत्तिरासां, सर्वात्मना चक्षुरिव प्रविष्टा ॥” इ

(८) द्रुतमध्यायाः,

“यद्यपि शीघ्रगति-मृदुगामी, बहुधनवानपि दुःखमुपैति ।
नातिशयत्वरिता न च मृद्वी, नृपतिगतिः कथिता द्रुतमध्या ॥”ह० ।

(९) हरिणप्लुतायाः,

“तव पुञ्ज-नराधिप विद्विषां, भयविवर्जितकेतुलघीयसाम् ।
रणभूमिपराङ्मुखवर्त्मनां, भवति शीघ्रगतिर्हरिणप्लुता ॥” ह० ।

(१०) अपरवक्त्रस्य,

“मम भुजबल-वेग-वेगितः, पततु शरोऽस्य महान् महोरसि ।
व्यपनयतु तनोश्च जीवितं, पततु ततश्च महीं विघूर्णितः ॥” रामा० ।

(११) मालभारिण्याः,

“वसने परिधूसरे वसाना, नियमक्षाममुखी धृतैकवेणिः ।
अतिनिष्करुणस्य शुद्धशीला, मम दीर्घं विरहव्रतं बिभर्त्ति ॥” शकु० ।

(१२) पुष्पिताग्रायाः,

“इति मतिरुपकल्पिता वितृष्णा, भगवति सात्वत-पुङ्गवे विभूम्नि ।
स्वसुखमुपगते क्वचिद्विहर्त्तुं, प्रकृतिमुपेयुषि यद्भवप्रवाहः ॥”भाग० १।९।३२।

(१४) यवमत्याः (पि०),

“पद्मकान्तु कोमले करे विभाति, प्रशंस्य मत्स्यलाञ्छनं पदे च यस्याः ।
सा यवान्विता भवेद्धनाधिका च, समस्त-बन्धुपूजिता प्रिया च पत्युः ॥” ह० ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अथ सप्तमोऽध्यायः।

——oo——

१। "शिखैकोनत्रिंशदेकत्रिंशदन्ते ग्।" पि०।

"यस्य प्रथमे पादे एकोनत्रिंशदक्षराणि द्वितीये चैकत्रिंशत्, द्वयोरपि पादयोरन्ते प्रत्येकं गुरुः, तद्वृत्तं शिखा नाम। अर्द्धाधिकाराद्द्वितीयमप्यर्द्धं तादृशमेव। अन्ते गिति नियमार्थमेतत्। अन्ते एव गुरुर्नान्यत्र। तेनायुक्पादेऽष्टाविंशतिरक्षराणि लघून्यन्ते गुरुरेकः। युक्पादे त्रिंश-ल्लघवोऽन्ते गुरुश्च।" ह०।

"शिखिगुणित-दशलघुरचितमपगत-लघु-युगलमपरमिदमखिलम्।
सगुरुशकलयुगलकमपि सुपरिघटित-ललितपदविततिभवति शिखा॥"
कें०।

२। "खञ्जा मद्वत्ययुजीति।" पि०।

"एकत्रिंशदक्षरो विषमः पादः कर्त्तव्यः, एकोनत्रिंशदक्षरश्च समः पादः।"
ह०।

"विनिमयविनिहितशकलयुगलकलितपदविततिविरचितगुणनिचया।
श्रुतिसुखकृदियमपि जगति जिजशिर उपगतवति सति भवति खजा॥" कें०।

'जिजशिरः उपगतवति सति खजा खञ्जा नाम च्छन्दः।'

३। इमे द्वे शिखा-खञ्जे वृत्तरत्नाकरस्य सममात्राख्यद्वितीयाध्यायान्तर्गते। परन्तु तयोरर्द्धयोः मात्रा न समसङ्ख्यकाः। पिङ्गलेन च सूत्रयन्थे शिखा नाम द्वे छन्दसी व्याख्याते, एकमर्द्धसममतस्थमपरञ्च मात्रा-च्छन्दोऽन्तर्गतं पूर्वमेव २६ पृष्ठे व्याख्यातं, प्राकृतग्रन्थे शिखाखञ्जयोर्येऽन्ये भेदा व्याख्यातास्ते नात्र गृहीताः। अनयोर्बहुरूपत्वादिह वृत्तरत्नाकरोक्तस्येयमस्पष्टतानुमीयते।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

४ । अत्र शिखाखञ्जयोर्लघुगुरुसङ्ख्या सङ्केतेन दर्श्यते ।

छन्दांसि	अयुक्पादे		युक्पादे	
	लघूनि	गुरु	लघूनि	गुरु
शिखायाः	२८	१	३०	१
खञ्जायाः	३०	१	२८	१

५ । उदाहरणं शिखायाः—

"अभिमत-वकुल-कुसुम-घनपरिमल-मिलदलि-मुखरित-हरिति मधौ,
सहचर-मलयपवन-रय-तरलित-सरसिजरजसि शुचितरणिवितते ।
विकसित-विविधकुसुमसुलभसुरभिशरमदन-निहित-सकलजने,
ज्वलयति मम हृदयमविरतमिह सुतनु तव विरह-दहन-विषमशिखा ॥" इ०

उदाहरणं खञ्जायाः—

"अपगतघन-विशददशदिशि हृतजनदृशि परिणतकणकपिलकलमे,
प्रविकसितसमकुसुमभवपरिमल-सुरभितमरुति शरदि समये ।
शुचिशशिमहसि विवृतसरसिरुहि मुदित-मधुलिहि विमलितधरणितले ।
किमपरमिह कमलमुखि सुखमनुभवति मम हृदयकमलमधुना ॥" इ० ।

अष्टमोऽध्यायः ।

अथ समवृत्तम् ।

१ । "ग्लिति समानी । २ । ल्गिति प्रमाणी ।
३ । वितानमन्यत् ।" पि० ।

"गकार-लकाराभ्यां यद्वृत्तं समाप्येत तत् 'समानी' नाम । लकार-गकाराभ्यां यद्वृत्तं समाप्येत तत् 'प्रमाणी' नाम, नाराचमित्यपरे । आभ्यां

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

समानी-प्रमाणीभ्याम् 'अन्यत्' अष्टाक्षरपादं छन्दो 'वितानं' नाम। किञ्च वितानमन्यदिति ब्रुवन् सूत्रकारो वितानस्यानेकप्रकारतां दर्शयति, अन्यथा वितानं भौ गौ इत्येव विदध्यात् ।" ह० ।

१। एभिस्त्रिभिः सूत्रैः समानी-प्रमाणी-वितानानीति त्रीणि साधारणनामान्येवोक्तानि। नत्वनुष्टुभो विशेषकानि। अन्यथा पिङ्गलाचार्य्यस्य प्राकृतग्रन्थगताष्टाक्षरमल्लिकेति विशेषसंज्ञाऽहेतुकी भवेत्, सूत्रग्रन्थगतं 'चित्रपदा भौ गौ' इति सूत्रञ्चानावश्यकं स्यात्। वस्तुतस्तु 'वितानमन्य'दित्यनेन सूत्रेण कस्यापि विशेषवृत्तस्य लक्षणं नोक्तं, समानी-प्रमाणी-लक्षणयोरभावविशिष्टमतिव्यापकं नामैव निर्दिष्टम् ।

२। अत्र हलायुध-वृत्तितः समानी-प्रमाणी-वितानानामुदाहरणानि चोद्ध्रियन्ते ।

(क) समान्याः, "वासवोऽपि विक्रमेण यत्समानतां न याति ।
तस्य वल्लभेश्वरस्य केन तुल्यता क्रियेत ॥

अपि च, ॐ नमो जनार्द्दनाय पापसङ्गमोचनाय ।
दुष्ट-दैत्य-मर्द्दनाय पुण्डरीकलोचनाय ॥"

(ख) प्रमाण्याः, "सरोजयोनिरम्बरे रसातले तथाच्युतः ।
तव प्रमाणमीक्षितुं क्षमौ न तौ बभूवतुः ॥"

(ग) वितानस्य, "तृष्णां त्यज धर्म्मं भज पापे हृदयं मा कुरु ।
इष्टा यदि लक्ष्मीस्तव शिष्टानन्निशं संश्रय ॥

द्वितीयञ्च, हृदयं यस्य विशालं गगनाभोगसमानम् ।
लभतेऽसौ मणिचित्रं नृपतिर्मूर्द्ध्नि वितानम् ॥

अन्यच्च, कङ्काल-मालधारिणं कन्दर्प-दर्प-हारिणम् ।
संसारबन्धमोचनं वन्दामहे त्रिलोचनम् ॥

अपि च, तस्याः स्मरामि सुन्दरं चन्द्रोपमानमाननम् ।
कन्दर्प-चाप-भङ्गुर-भ्रू-विभ्रमोपशोभितम् ॥
अन्यदतो हि वितानं श्वेतपटेन यदुक्तम् ।
चित्रपदापि च भौ गौ तेन गतार्थमिवैतत् ॥"

इति घोषकृते छन्दःसारसंग्रहे वृत्तभेदो नाम द्वितीयोऽंशः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तृतीयोऽंशः ।

प्रथमोऽध्यायः ।

अथ समवृत्तभेदाः ।

"'आरभ्यैकाक्षरात्पादादेकैकाक्षरवर्द्धितैः' ।
पादैरुक्थादिसंज्ञं स्याच्छन्दः 'षड्विंशतिं गतम् ।'" कें०, ग० ।*

१ । उक्थायां श्रीः । तल्लक्षणं "सी सा जं गो ।" प्रा० । "ग्श्रीः ।" कें० । साङ्केतिकम् (—) उदाहरणञ्च "श्रीस्ते सास्ताम् ।" ग० ।

२ । अत्युक्थायाम्,

१ । कामः स्त्री वा—तल्लक्षणम्, "दीहा वीहा, कामो रामो ।" प्रा० । "गौ स्त्री ।" कें० । सां (— —) । यथा—

"तुज्झे मुज्झे सुब्भं देउ ।" प्रा० ।

२ । मधु—"लहु जुअ । महु धुअ ॥" प्रा० । सां (⌣ ⌣) ।

३ । मही—"लगौ जही । मही कही ॥" प्रा० । सां (⌣—) ।

४ । सारः—"सारु एहु । गो वि रेह ॥" प्रा० । सां (—⌣) ।

३ । मध्यायाम्,

१ । ताली नारी वा—तल्लक्षणं "तालीए जाणीए । गोकण्णा तीवण्णा ॥" प्रा० । "मो नारी ।" कें० । सां (— — —) ।

यथा "गोपानां नारीभिः । श्लिष्टोऽव्यात् कृष्णो वः ॥" ग० ।

२ । प्रिया मृगी वा—"हे पिए लेक्खिए । अक्खरे तिण्णि रे ॥" प्रा० । "रो मृगी ।" कें० । सां (—⌣—) ।

---

* पिङ्गलाचार्य्येण सूत्रग्रन्थे लौकिकच्छन्दःप्रकरणे एकाक्षरावधि पञ्चाक्षरपर्य्यन्तं वृत्तं नोक्तम् । वैदिके तु तद्दृश्यते ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यथा "सा मृगीलोचना । राधिका श्रीपतेः ॥" ग० ।

३ । शशी—"ससी सो जं णीओ । फणिँन्दे भणीओ ॥" प्रा० । सां (⏑ – –) ।

४ । रमणः—"सगणो रमणो । सहिओ कहिओ ॥" प्रा० । सां (⏑ ⏑ –) ।

५ । पञ्चालः—"तक्कार जं दिट्ठ । पञ्चाल उक्किट्ठ ॥" प्रा० । सां (– – ⏑) ।

६ । मृगेन्द्रः—"णरेन्द ठवेहु । मइन्द करेहु ॥" प्रा० । सां (⏑ – ⏑) ।

७ । मन्दरः—"भो जहि सो सहि । मन्दर सुन्दर ॥" प्रा० । सां (– ⏑ ⏑) ।

८ । कमलः—"कमल पभण । सुमुहि णगण ॥" प्रा० । सां (⏑ ⏑ ⏑) ।

४ । प्रतिष्ठायाम्,

१ । तीर्णा कन्या वा —"चारी हारा, अट्ठा काला । विसे कसा, जाणे तिस्सा ॥" प्रा० । "ग्मौ चेत्कन्या ।" के० । सां (– – – –) ।

यथा "भास्वत्कन्या, सैका धन्या । यस्याः कूले, कृष्णोऽखेलत् ॥" ग० ।

२ । सती—"नगि सती ।" ग० । सां (⏑ ⏑ ⏑ –) ।

यथा "मुररिपो, तव पदम् । नमति सा, ननु सती ॥" ग० ।

३ । धारि,"वस धारि,मुध्धि धारि । विसि हारि, दोस मारि ॥"प्रा० । तथा च वृत्तरत्नावल्यां "रं विधाय, लं निधाय । धारि नाम, वृत्तमेहि ॥" सां (– ⏑ – ⏑) ।

४ । नगानी—"पओहरो, गुरूतरो । णगाणिआँ,सजाणिआँ ॥"प्रा० । सां (⏑ – ⏑ –) ।

५ । सुप्रतिष्ठायाम्,

१ । हंसः पङ्क्तिरचरपङ्क्तिर्वा—तल्लक्षणम्, "पिंगल दिट्ठो, भ इह सिट्ठो । कस दुदिज्जो, हंस मुणिज्जो ॥" प्रा० । "भ्गौ गिति

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पङ्क्तिः ।" के० । "आद्यचतुर्थं, पञ्चमकं चेत् । यत्र गुरुः, स्यात्साक्षरपङ्क्तिः ॥" श्रु० । सां (–⌣⌣––) ।

२ । प्रिया—"सलगैः प्रिया ।" ग० । सां (⌣⌣–⌣⌣–) ।

३ । सम्मोहा —"संमोहारूअं, दिट्ठो सोभूअम् ।
वे कण्णा हारो, भूअन्ता सारो ॥" प्रा० । सां (––––––) ।

४ । हारीतः—"आई हि अन्ते, हारे सजुत्ते ।
मज्भेक गन्धो, हारीअ बन्धो ॥" प्रा० । सां (––⌣––) ।

५ । यमकम्—"सुपिअ भण, सरस मण ।
सरह गण, जमक गुण ॥"प्रा० । सां (⌣⌣⌣⌣⌣ ।

अथ द्वितीयोऽध्यायः ।

—००—

(क) "गायत्रे छन्दसि ।" ह० ।

१ । "तनुमध्या त्यौ ।" पि० ।

"अत्र पादान्ते विशेषेण विश्रामः कर्त्तव्य इत्याम्नायः ।" ह० ।

"त्यौ चेत्तनुमध्या ।" के० ।

२ । चतुर्वंशा शशिवदना वा—"ठइ चउवंसा, फणि वइ भासा ।
दिअवर कण्णो, फुलरसवण्णो ॥" प्रा० । "शशिवदना न्यौ ।" के० ।
"अगुरुचतुष्कं भवति गुरू द्वौ । घनकुचयुग्मे शशिवदनासौ ।" श्रु० ।

३ । शेषा विद्युल्लेखा वाणी वा—"वाराहा मत्ता जं, कण्णा तीआ होतं ।
हारा छक्का बंधो, सेसारूआ छन्दो ॥" प्रा० । "विद्युल्लेखा मो मः ।" के० ।
"सर्वे चेद्दीर्घार्णा, वाणीति प्रोक्ता सा ।" इति दण्डिटीका ।

४ । वसुमती—"त्सौ चेद् वसुमती ।" के० ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

५ । शङ्खनारी सोमराजी वा—"छआवसबद्धा, भुअङ्गापअद्धा ।
पआ पाअ चारी, कही सङ्खणारी ॥" प्रा० । "द्विया सोमराजी ।" ग० ।

६ । "पिअ डिस धुअं, सगणेण जुअं । छअवसपओ, कलकठ्ठ ठओ ॥

७ । अक्खरा जेछआ, सा विजोहा पआ । मत्त पंचा दुणा, विसि जोहा गणा ॥

८ । कामावआरेण, अद्धेण पाएण । मत्ता दहा सुद्ध, मन्थाण सो बुद्ध ॥

९ । धअं सरवीअ, मणीगुण तीअ । रई लहु अन्त, स मालइ कन्त ॥

१० । दिअवर किअ, भणइ सुपिअ । दमणअ गुण, फणिवइ भण ॥" प्रा० ।

११ । अत्रैषां छन्दसां लघुगुरुक्रमो रेखाभिर्दर्श्यते ।

वृत्तनामानि गायत्र्याम्	वर्णानां लघुगुरुक्रमः					
	१	२	३	४	५	६
१ । तनुमध्या	—	—	⏑	⏑	—	—
२ । शशिवदना	⏑	⏑	⏑	⏑	—	—
३ । विद्युल्लेखा	—	—	—	—	—	—
४ । वसुमती	—	—	⏑	⏑	⏑	—
५ । सोमराजी	⏑	—	—	⏑	—	—
६ । डीनम्	⏑	⏑	—	⏑	⏑	—
७ । द्वियोधा	—	⏑	—	—	⏑	—
८ । मन्थानः	—	—	⏑	—	—	⏑
९ । मालती	⏑	—	⏑	⏑	—	⏑
१० । दमनकम्	⏑	⏑	⏑	⏑	⏑	⏑

(ख) उष्णिहि ।

१ । "कुमारललिता ज्सौ ग् ।" पि० ।

"त्रिभिश्चतुर्भिश्च यत्युपदेशं वर्णयन्ति । अत्र केचिद् द्वाभ्यां पञ्चभिश्च यतिमिच्छन्ति ।" ह० । "कुमारललिता ज्स्गाः ।" के० ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

२ । मदलेखा—"म्सौ गः स्यान्मदलेखा ।" के० ।

"तुर्य्यं पञ्चमकं चेद्यत्र स्याल्लघु बाले ।

विद्वद्भिर्मृगनेत्रे प्रोक्ता सा मदलेखा ॥" श्रु० ।

३ । मधुमती—"ननगि मधुमती ।" के० ।

४ । हंसमाला—"सरगैर्हंसमाला ।" के० ।

५ । समानी—"चारि हार किज्जही, तिण्णि गन्ध दिज्जही ।

सत्त अक्खरा ठिआ, सा समाणिआ पिआ ॥

६ । भणउ सुवासउ,* लहु सुविसेसउ । रइचउ मत्तह, भगणहि अन्तह ॥

७ । चरणगण विप्प, पढ़म लइ थप्प । जगण तसु अन्त, भणइ करहञ्च ॥

८ । सत्ता दीहा जाणेही, कण्णा ती गो माणेही ।

चाउद्दाहा मत्ताणा, सीसोरूओ छन्दाणा ॥" प्रा० ।

९ । अत्रैषां छन्दसां लघुगुरुक्रमो रेखाभिर्दर्श्यते ।

वृत्तनामानि उष्णिहि	वर्णानां लघुगुरुक्रमः						
	१	२	३	४	५	६	७
१ । कुमारललिता	⌣	—	⌣	⌣	⌣	—	—
२ । मदलेखा	—	—	—	⌣	⌣	—	—
३ । मधुमती	⌣	⌣	⌣	⌣	⌣	⌣	—
४ । हंसमाला	⌣	⌣	—	—	⌣	—	—
५ । समानी	—	⌣	—	⌣	—	⌣	—
६ । सुवासः	⌣	⌣	⌣	⌣	—	⌣	⌣
७ । करहञ्चम्	⌣	⌣	⌣	⌣	⌣	—	⌣
८ । शीर्षरूपम्	—	—	—	—	—	—	—

* एसियातिक-समितिस्थपुस्तकेऽयं पाठः । संस्कृतविद्यालयस्थपुस्तके तु 'सरसा' इति ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(ग) अनुष्टुभि ।

१ । "माणवकाक्रीड़ितकं भ्तौ ल्गौ ।" पि० ।

"अत्र चतुर्भिश्चतुर्भिश्च यतिरित्याम्नायः ।" ह० ।

"आदिगतन्तुर्य्यगतं पञ्चमकञ्चान्त्यगतम् ।
स्याद्गुरु चेत् सङ्कथितं माणवकाक्रीड़मिदम् ॥" श्रु० ।

२ । "चित्रपदा भौ गौ ।" पि० ।

"भौ गिति चित्रपदा गः ।" के० । "अत्र पादान्ते यतिः ।" ह० ।

३ । "विद्युन्माला मौ गौ ।" पि० ।

"सर्वे वर्णा दीर्घा यस्या विश्रामः स्याद्वेदैर्वेदैः ।
विद्वद्वृन्दैर्वीणावाणि व्याख्याता सा विद्युन्माला ॥" श्रु० ।

"अत्र चतुर्भिश्चतुर्भिश्च यतिरित्याम्नायः ।" ह० ।

४ । "हंसरुतं म्नौ गौ ।" पि० ।

"म्नौ गौ हंसरुतमेतत् ।" के० ।

५ । समानिका मल्लिका वा—"हारगन्धबन्धवेण, दिट्ट अट्ठ अक्खरेण ।
वारहाइ मत्त जाण, मल्लिआ सुछन्द माण ॥" प्रा० ।*

"जौ समानिका गलौ च ।" के० । "ग्लौ रजौ समानिका तु ।" ग० ।*

६ । प्रमाणिका नगस्वरूपिणी वा—
"लहु गुरु णिरन्तरा, पमाणि अट्ठ अक्खरा ।
पआणि दूण किज्जए, णराअ सो भणिज्जए ॥" प्रा० ।

"प्रमाणिका जरौ लगौ ।" के० ।

"द्वितुर्यषष्ठमष्टमं गुरु प्रयोजितं यदा ।
तदा निवेदयन्ति तां बुधा नगस्वरूपिणीम् ॥" श्रु० ।

* रामतारणशिरोमणिना समानिकामल्लिके पृथग्निर्द्दिष्टे । भ्रामादिकमिदम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

७। वितानम्—"वितानमाभ्यां यदन्यत् ।" के० ।*

८। गजगतिः—" 'नभलगा गजगतिः' इति कस्यापि ।" ग० ।

९। नाराचिका—"नाराचिका तरौ लगौ ।" ग० ।

१०। तुङ्गः—"तरलणअणि तुंगो, पढ़म गण सुरंगो ।
णअण जुअल बद्धो, गुरु जुअल पसिद्धो ॥" प्रा० ।

११। कमलः—"पढ़म गण विप्पओ, विहु तह णरेंदओ ।
गुरु सहिअ एंतिणा, कमल इम भन्तिणा ॥" प्रा० ।

१२। अवैषां छन्दसां लघुगुरुक्रमो रेखाभिर्दर्श्यते ।

वृत्तनामानि अनुष्टुभि		वर्णानां लघुगुरुक्रमः							
		१	२	३	४	५	६	७	८
१। माणवकाक्रीड़ितकम्		—	⌣	⌣	—	—	⌣	⌣	—
२। चित्रपदा		—	⌣	⌣	—	⌣	⌣	—	—
३। विद्युन्माला		—	—	—	—	—	—	—	—
४। हंसरुतम्		—	—	—	⌣	⌣	⌣	—	—
५। समानिका		—	⌣	—	⌣	—	⌣	—	⌣
६। प्रमाणिका		⌣	—	⌣	—	⌣	—	⌣	—
७। वितानम्	बहुरूपं	५८	पृ	ष्ठे	प्र	द	र्शि	त	ञ्च
८। गजगतिः		⌣	⌣	⌣	—	⌣	⌣	⌣	—
९। नाराचिका		—	—	⌣	—	⌣	—	⌣	—
१०। तुङ्गः		⌣	⌣	⌣	⌣	⌣	⌣	—	—
११। कमलः		⌣	⌣	⌣	⌣	⌣	—	⌣	—

* सूत्रमिदं रामतारणशिरोमणिना गजगतिहंसरुताभ्यां परं निर्दिष्टम् । अत आभ्यामित्यनेन गजगति-हंसरुताभ्यामेवोपपद्यते । तच्चिन्त्यम् । पिङ्गलसूत्रग्रन्थे वृत्तरत्नाकरे च समानीप्रमाणीभ्यां परं ह्येदं सूत्रं दृश्यते । हलायुधेन च पुनः स्पष्टं व्याख्यातमाभ्यां समानीप्रमाणीभ्यामिति ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(घ) बृहत्याम् ।

१ । "भुजगशिशुसृता* नौ म् ।" पि० ।

"भुजगशिशुसृता नौ मः ।" के० । "सप्तभिर्द्वाभ्याञ्च यतिरित्याम्नायः ।" ह० ।

२ । "हलमुखी नौँ स् ।" पि० ।

"रान्नसाविह हलमुखी ।" के० । "त्रिभिः षड्भिश्च यतिरित्याम्नायः ।" ह० ।

३ । मणिमध्यम्—"स्यान्मणिमध्यं चेद्भमसाः ।" ग० ।

"चम्पकमाला यत्र भवेदन्त्यविहीना प्रेमनिधे ।
छन्दसि दत्ता ये कवयस्तन्मणिमध्यन्ते ब्रुवते ॥" श्रु० ।

४ । भद्रिका—"भद्रिका भवति रो नरौ ।" के० ।

५ । भुजङ्गसङ्गता—"सजरैर्भुजङ्गसङ्गता ।" ग० ।

६ । कमला—"सुपिअ गण रमणिआ, दिअ गण जुअ अणिआ ।
गुरु धरिअ पइ पओ, दह कलअ कमलओ ॥" प्रा० ।

"द्विगुण नगण सहितः सगण इह हि विहितः ।
फणिपतिमतिविमला च्चितिप भवति कमला ॥" इति वृत्तरत्नावल्याम् ।

७ । रूपमाली—"णाआ राआ जंपे साराए, चारी कसा अंते हाराए ।
अठ्ठाहारो मत्ता पाआए, रूआमाली छंदो जंपूसे ॥" प्रा० ।

८ । महालच्मीः—"दिठ्ठ जोहागणा तिसिआ, णाअराएण जा विसिआँ ।
मासअद्धेण पाअठ्ठिअं, जाण मुद्धे महालच्छिअं ॥" प्रा० ।

९ । सारङ्गिका—"दिअवर कसो सअणं, पअपअ मत्ता गणणं ।
सर मुणि मत्ता लहिअं, सहि सरगिका कहिअं ॥" प्रा० ।

१० । पवित्रा—"कुन्तीपुत्ता जुअ लहिअं, तीए विप्पो धुअ कहिअं ।
अन्ते हारो जइ जणिअं, पाइत्ता रूअउ कहिअं ॥" प्रा० ।

---

* भृता, युता, वृता इत्येते बहुतिथपाठभेदा दृश्यन्ते ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

११ । विम्बः—“रइअ फणि विंब एसो, गुरु जुअल सव्व सेसो ।
सिरसि दिअ मज्झ राओ, गुणह गुणिए सहाओ ॥” प्रा० ।

१२ । तोमरम्—“जसु आइ हत्थ विआण, तसु वे पओहर जाण ।
पभणेइ णाअणरेंद, इम जाए तोमर छंद ॥” प्रा० ।

१३ । अत्रैषां छन्दसां लघुगुरुक्रमो रेखाभिर्दर्श्यते ।

वृत्तनामानि वृत्त्याम्	वर्णानां लघुगुरुक्रमः								
	१	२	३	४	५	६	७	८	९
१ । भुजगशिशुसृता	⏑	⏑	⏑	⏑	⏑	⏑	—	—	—
२ । हलमुखी	—	⏑	—	⏑	⏑	⏑	⏑	⏑	—
३ । मणिमध्यम्	—	⏑	⏑	—	—	—	⏑	⏑	—
४ । भद्रिका	—	⏑	—	⏑	⏑	⏑	—	⏑	—
५ । भुजङ्गसङ्गता	⏑	⏑	—	⏑	—	⏑	—	⏑	—
६ । कमला	⏑	⏑	⏑	⏑	⏑	⏑	⏑	⏑	—
७ । रूपमाली	—	—	—	—	—	—	—	—	—
८ । महालक्ष्मीः	—	⏑	—	—	⏑	—	—	⏑	—
९ । सारङ्गिका	⏑	⏑	⏑	⏑	—	—	⏑	⏑	—
१० । पवित्रा	—	—	—	—	⏑	⏑	⏑	⏑	—
११ । विम्बः	⏑	⏑	⏑	⏑	⏑	—	⏑	—	—
१२ । तोमरम्	⏑	⏑	—	⏑	—	⏑	⏑	—	⏑

(ङ) पङ्क्तौ ।

१ । “शुद्धविराण्म्सौ जगौ ।” पि० ।

“अत्र पादान्ते यतिः ।” हृ० । “म्सौ जगौ शुद्धविराड़िदं मतम् ।” के० ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

२। "पणवो म्नौ यगौ ।" पि० ।

"म्नौ यगौ चेति पणवनामेदम् ।" के० । "अत्र च पञ्चभिः पञ्चभिर्यतिरित्याम्नायः ।" ह० ।

३। "रुक्मवती भ्मौ स्गौ ।" पि० । "पादान्ते यतिः ।" ह० ।

"तन्वि गुरुः स्यादाद्यचतुर्थं, पञ्चमषष्ठञ्चान्त्यमुपान्त्यम् ।
इन्द्रियबाणैर्यत्र विरामः, सा कथनीया चम्पकमाला ।" श्रु० ।

"भ्मौ सगयुक्तौ रुक्मवतीयम् ।" के० ।

४। "मयूरसारिणी र्जौ र्गौ ।" पि० ।

"र्जौ रगौ मयूरसारिणी स्यात् ।" के० । "अत्र पादान्ते यतिः ।" ह० ।

५। "मत्ता म्भौ स्गौ ।" पि० । "ज्ञेया मत्ता मभसगयुक्ता ।" के० ।
"चतुर्भिः षड्भिश्च यतिरित्याम्नायः ।" ह० ।

६। "उपस्थिता त्जौ ज्गौ ।" पि० ।

"तो जौ गुरुणेयमुपस्थिता ।" के० ।

"अत्र द्वाभ्यामष्टाभिश्च यतिरित्याम्नायः ।" ह० ।

७। मनोरमा—"नरजगैर्भवेन्मनोरमा ।" के० ।

८। हंसी—"ज्ञेया हंसी मभनगयुता ।" परि० ।

"मन्दाक्रान्तान्त्ययतिरहिता, सालङ्कारे यदि भवति या ।
सा विद्वद्भिर्ध्रुवमभिहिता, ज्ञेया हंसी कमलवदने ॥" श्रु० ।

९। दीपकमाला—"दीपकमाला भ्मौ मता जगौ ।" परि० ।

१०। त्वरितगतिरमृतगतिर्वा—"त्वरितगतिश्च नजनगैः ।" ग० ।

"दिअवर हार पअलिआ, पुणवि तहव्वि अकहिआ ।
ठवसु लहु वे गुरु सहिआ, अमिअगइ धुअ कहिआ ॥" प्रा० ।

११। संयुता—"जसु आइ हत्थ विआणिओ, तसु वे पओहर जाणिओ ।
गुरुअन्त पिंगल जंपिओ, सहि छंद संयुत्त थप्पिओ ॥" प्रा० ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

१२ । सारवती—"दीह लहुजुअ दीह लहु, सारवई धुअ छंद कहु ।
अंत पओहर थप्प धआ, चोद्दह मत्त विआमकआ ॥" प्रा० ।

१३ । सुषमा—"कण्णो पढ़मो हत्थो जुअलो, कण्णो तिअलो हत्थो पअलो ।
सोला कलया छक्का वलआ, एसा सुसमा दिट्ठा सुसमा ॥" प्रा० ।

१४ । अथैषां छन्दसां लघुगुरुक्रमो रेखाभिर्दर्श्यते ।

वृत्तनामानि पङ्क्तौ	वर्णानां लघुगुरुक्रमः									
	१	२	३	४	५	६	७	८	९	१०
१ । शुद्धविराट्	—	—	—	⌣	⌣	—	⌣	—	⌣	—
२ । पणवः	—	—	—	⌣	⌣	⌣	⌣	—	—	—
३ । रुक्मवती चम्पकमाला वा	—	⌣	⌣	—	—	—	⌣	⌣	—	—
४ । मयूरसारिणी	—	⌣	—	⌣	—	⌣	—	⌣	—	—
५ । मत्ता	—	—	—	—	⌣	⌣	⌣	⌣	—	—
६ । उपस्थिता	—	—	⌣	⌣	—	⌣	⌣	—	⌣	—
७ । मनोरमा	⌣	⌣	⌣	—	⌣	—	⌣	—	⌣	—
८ । हंसी	—	—	—	—	⌣	⌣	⌣	⌣	⌣	—
९ । दीपकमाला	—	⌣	⌣	—	—	—	⌣	—	⌣	—
१० । त्वरितगतिरमृतगतिर्वा	⌣	⌣	⌣	⌣	—	⌣	⌣	⌣	⌣	—
११ । संयुक्ता	⌣	⌣	—	⌣	—	⌣	⌣	—	⌣	—
१२ । सारवती	—	⌣	⌣	—	⌣	⌣	—	⌣	⌣	—
१३ । सुषमा	—	—	⌣	⌣	—	—	—	⌣	⌣	—

(च) त्रिष्टुभि ।

१ । "इन्द्रवज्रा तौ जगौ ग् ।" पि० ।

"पादान्ते यतिः ।" ह० ।

"यस्यास्त्रिषट् सप्तममक्षरं स्यात्, ह्रस्वं सुजङ्घे नवमञ्च तद्वत् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

गत्या विलज्जीकृतहंसकान्ते, तामिन्द्रवज्रां ब्रुवते कवीन्द्राः ॥" श्रु० ।

२ । "उपेन्द्रवज्रा जतौ जगौ ग् ।" पि० ।

"अत्र पादान्ते यतिः ।" ह० ।

"यदीन्द्रवज्राचरणेषु पूर्वे, भवन्ति वर्णा लघवः सुवर्णे ।
अमन्दमाद्यन्मदने तदानी-मुपेन्द्रवज्रा कथिता कवीन्द्रैः ॥" श्रु० ।

३ । "आद्यन्तावुपजातयः ।
अत्रोपजातिर्विविधा विदग्धैः, संयोज्यते तु व्यवहारकाले ।
अतः प्रयत्नः प्रथमं विधेयो, नृपेण पुंरत्नपरीक्षणाय ॥" पि० ।

"केचिदिदं सूत्रं न्यायोपलक्षणपरं व्याचक्षते । तेन वंशस्थेन्द्रवंशापादयोरपि सङ्करादुपजातयो भवन्ति । तथा शालिनीवातोर्म्मीपादयोः । अन्येषामपि स्वल्पभेदानां प्रयोगानुसारेणोपजातयो ज्ञेयाः ।" ह० ।

"यत्र द्वयोरप्यनयोस्तु पादा, भवन्ति सीमन्तिनि चन्द्रकान्ते ।
विद्वद्भिराद्यैः परिकीर्त्तिता सा, प्रयुज्यतामित्युपजातिरेषा ॥" श्रु० ।

उपजातयस्तु चतुर्द्दशसङ्ख्याता भवन्तीति एतद्ग्रन्थप्रारम्भकांशे निर्दिष्टम् । इन्द्रवज्रोपेन्द्रवज्रयोः चतुर्दशोपजातीनां चतुर्दश नामानि पिङ्गलेनोक्तानि प्राकृतग्रन्थे । यथा—

१ । कीर्त्तिः, उ, इ । इ, इ ॥ श्रुतबोधस्य विपरीताख्यानकीयषा । २ । वाणी, इ, उ । इ, इ ॥ ३ । माला, उ, उ । इ, इ ॥ ४ । शाला, इ, इ । उ, इ ॥ ५ । हंसी, उ, इ । उ, इ ॥ विपरीताख्यानिकी सा । ६ । माया, इ, उ । उ, इ ॥ ७ । जाया, उ, उ । उ, इ ॥ ८ । बाला, इ, इ । इ, उ ॥ ९ । आर्द्रा, उ, इ । इ, उ ॥ १० । भद्रा, इ, उ । इ, उ ॥ आख्यानिकी चैषा । ११ । प्रेमा, उ, उ । इ, उ ॥ १२ । रामा, इ, इ । उ, उ ॥ १३ । ऋद्धिः, उ, इ । उ, उ ॥ १४ । बुद्धिः, इ, उ । उ, उ ॥ श्रुतबोधस्याख्यानकीयषा ।

४ । "दोधकं भौ भगौ ग् ।"* पि० ।

"अत्र पादान्ते यतिः ।" ह० ।

---

* पैङ्गलप्राकृतग्रन्थे बन्धुनाम्ना दोधकनाम्ना च एकमेव छन्दः पृथग्व्याख्यातं दृश्यते । प्रक्षिप्तमेतदित्यनुमीयते ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

"आद्यचतुर्थमहीननितम्बे, सप्तमकन्दशमञ्च तथान्त्यम्।
यत्र गुरु प्रकटस्मरसारे, तत् कथितन्ननु दोधकवृत्तम्॥" श्रु०।

५। "शालिनी म्तौ तगौग् समुद्र ऋषयः।" पिं०।

"ह्रस्वो वर्णो जायते यत्र षष्ठः, कम्बुग्रीवे तद्वदेवाष्टमान्त्यः।
विश्रामःस्यात्तन्वि वेदैस्तुरङ्गैः, तां भाषन्ते शालिनीं छान्दसीयाः॥" श्रु०।

६। "वातोर्म्मी म्भौ तगौ ग्।" पिं०।

"वातोर्मीयं कथिता म्भौ तगौ गः।" के०। "चतुर्भिः सप्तभिश्च यतिः।" ह०।

७। "रथोद्धता नौ लौ ग्।" पिं०। "पादान्ते यतिः।" ह०।

"आद्यमक्षरमतस्तृतीयकं, सप्तमञ्च नवमन्तथान्तिमम्।
दीर्घमिन्दुमुखि यत्र जायते, तां वदन्ति कवयो रथोद्धताम्॥" श्रु०।

८। "स्वागता नौ भगौ ग्।" पिं०।

"अत्र पादान्ते यतिः।" ह०।

"अक्षरञ्च नवमन्दशमञ्च, व्यत्ययाद्भवति यत्र विनीते।
प्राक्तनैः सुनयने यदि सैव, स्वागतेति कविभिः कथिता सा॥" श्रु०।

९। "भ्रमरविलसिता म्भौ न्लौ ग्।" पिं०।

"म्भौ न्लौ गः स्याद्भ्रमरविलसितम्।" के०। "चतुर्भिः सप्तभिश्च यतिः।" ह०।

१०। "वृन्ता नौ स्गौ ग्।" पिं०। "सैव यतिः।" ह०।

"ननसगगुरुरचिता वृन्ता।" के०।

११। "श्येनी जौ लौ ग्।" पिं०।

"श्येन्युदीरिता रजौ रलौ गुरुः।" ग०। "अत्र पादान्ते यतिः।" ह०।

१२। "विलासिनी ज्रौ ज्गौ ग्।" पिं०।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

१३। गाथायां, "कुड्मलदन्ती भ्तौ न्गौ गिन्द्रियरसाः।" पि०।
"वाणरसैः स्याद्भतनगगैः श्रीः। मौक्तिकमाला यदि भतनाद्गौ।" के०।*
"स्यादनुकूला भतनगगाश्चेत्।" ग०।
१४। सान्द्रपदम्—"सान्द्रपदं स्याद्भतनगलैश्च।" परि०।
१५। सुमुखी—"नजजलगैर्गदिता सुमुखी।" के०।
"दिअवर हार लहू जुअला, वलअ पविट्ठअ हत्थअला।
पअ कल चोद्दह जं पुअही, कह वरवल्लहि हो सुमुही॥" प्रा०।
१६। भद्रिका—"ननरलगुरुभिश्च भद्रिका।" के०।
१७। मोटनकम्—"स्यान्मोटनकं तजजाश्च लगौ।" गं०।
१८। उपस्थितं शिखण्डितं वा—
"उपस्थितमिदं ज्सौ ताद् गकारौ।" के०।
"शिखण्डितमिदं ज्सौ त्गौ गुरुश्चेत्।" परि०।
१९। उपचित्रम्—"उपचित्रमिदं सससाल्लगौ।" के०।
२०। कुपुरुषजनिता—"कुपुरुषजनिता ननौ गौं गः।" के०।
२१। अनवसिता—"अनवसिता न्यौ भ्गौ गुरुरन्ते।" के०।
२२। विध्वङ्कमाला—"विध्वङ्कमाला भवेत्तौ तगौ गः।" परि०।
२३। दमनकम्—"दिअवर जुअ लहु जुअलं, पअ पअ पअलिअ वलअं।
चउपअ चउवसु कलयं, दमणअ भण फणिभणिअं॥" प्रा०।
२४। मालतीमाला—
"कुन्तीपुत्ता पंचा दिणा जाणीआ, अन्ते कन्ता एक्का हारा माणीआ।
पाआपाआ मत्ता पत्ता बाईसा, मालत्तीमाला जंपत्ता णाएसा॥" प्रा०।
२५। द्रुता—"रेण जेन सेन लगयोर्द्रुता।"
२६। इन्दिरा—"नररलैर्गुराविन्दिरा मता।"
रामतारणशिरोमणिष्टते इमे वृत्ते।

---

* वृत्तरत्नाकरे श्रीनाम्ना मौक्तिकमालानाम्ना च एकमेव वृत्तं व्याख्यातम्। ते च अनुकूला च कुड्मल-दन्तिनो नामान्तराणि।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वृत्तनामानि त्रिष्टुभि	वर्णानां लघुगुरुक्रमः										
	१	२	३	४	५	६	७	८	९	१०	११
१ । इन्द्रवज्रा	—										
२ । उपेन्द्रवज्रा	⏑	—	⏑	—	—	⏑	⏑	—	⏑	—	—
३ । उपजातयश्चतुर्दश	*										
४ । दोधकम्	—	⏑	⏑	—	⏑	⏑	—	⏑	⏑	—	—
५ । शालिनी	—	—	—	—	—	⏑	—	—	⏑	—	—
६ । वातोर्म्मी					⏑						
"उदेत्यसौ सुधाकरः पुरो विलोकयाद्य राधिके विजृम्भमाणगौरदीधितिः,
रतिस्वहस्तनिर्म्मितः कलाकुतूहलेन चारुचम्पकैरनङ्गशेखरः किमु ।
इति प्रमोदकारिणीं प्रियाप्रसादलक्षणां गिरं समुद्गिरन् मुरारिरद्भुताम्,
प्रदोषकालसङ्गमोल्लसन्मना मनोज्ञकेलिकौतुकी करोतु नः कृतार्थताम् ॥"
ग० ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(ङ) यगणवर्गः । सां (⏑ — —) ।

१ । शशी त्र्यक्षरा, यथा—"भवाणी हसंती । दुरित्तं हरंती ॥" प्रा० ।

२ । शङ्खनारी सोमराजी वा षड़क्षरा, यथा—

"हरे सोमराजी-समा ते यशःश्रीः । जगन्मण्डलस्य च्छिनत्त्यन्धकारम् ॥"

ग० ।

३ । भुजङ्गप्रयातं द्वादशाक्षरम्, यथा—

"पुरः साधुवद्भाति मिथ्याविनीतः, परोक्षे करोत्यर्थनाशं हताशः ।

भुजङ्गप्रयातोपमं यस्य चित्तम्, त्यजेत्तादृशं दुश्चरित्रं कुमित्रम् ॥" ह० ।

तथा च महानिर्वाणतन्त्रे,

"त्वमेकं शरण्यं त्वमेकं वरेण्यं, त्वमेकं जगत्कारणं विश्वरूपम् ।

त्वमेकं जगत्कर्त्तृ पातृ प्रहर्त्तृ, त्वमेकं परं निश्चलं निर्व्विकल्पम् ॥

भयानां भयं भीषणं भीषणानां, गतिः प्राणिनां पावनं पावनानाम् ।

महोच्चैःपदानां नियन्तृ त्वमेकं, परेषां परं रक्षकं रक्षकाणाम् ॥

तदेकं स्मरामस्तदेकं जपामः, तदेकं जगत्साक्षिरूपं नमामः ।

तदेकं निधानं निरालम्बमीशं, भवाम्भोधिपोतं शरण्यं व्रजामः ॥"

४ । कन्दमन्त्यगुरुद्वयहीनं त्रयोदशाक्षरं, यथा—

"णरे कंस जाणेहि हो एक बालाइ, हउ देवईपुत्त तो वंस कालाइ ।

तहा गेत्थकंसो जणाणंदकंदेण, जहा हत्ति दिट्ठो णिआणारिविंदेण ॥"

प्रा० ।

५ । क्रीड़चक्रमष्टादशाक्षरं, यथा—

"जहीँ भूत वेताल णच्चंत गावंत खाए कवंधा,

सिवा फेरु फिक्कार हक्कावलंता फुले कसरंधा ।

कआ टुट्ट फुट्टेइ मत्था कवंधा णचंता हसंता,

तहाँ वीर हम्मीर संगाम मज्झे तुलंता वुलंता ॥" प्रा० ।

६ । सिंहविक्रीड़-नामकस्य दण्डकस्य सप्तविंशत्यक्षरस्य तदधिकाक्षरस्य वा वृत्तरत्नाकरपरिशिष्टे लक्षणमेव दृश्यते ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(च) रगणवर्गः। सां (— ⏑ —)।

१। प्रिया मृगी वा त्र्यक्षरा, यथा—

"संकरो, संकरो। पाउणो, पाउणो॥" प्रा०।

२। द्वियोधा षड़क्षरा, यथा—

"कंससंहारिणा, पक्खिसंचारिणा। देवईडिंवत्रा, देउमे णिब्भत्रा॥" प्रा०।

३। महालक्ष्मीर्नवाक्षरा, यथा—

"मुंडमाला गलेँ कंठिआ, णाअराआ भुआ संठिआ।
वघ्‌घछाआ किआवासणा, चंडिआ पाउ सिंहासणा॥" प्रा०।

४। स्रग्विणी लक्ष्मीधरा वा द्वादशाक्षरा, यथा—

"यो रणे युध्यते निर्भरं निर्भयस्त्यागिता यस्य सर्व्वस्वदानावधिः,
तं नरं वीक्ष्य लक्ष्मीर्यशः स्रग्विणो, नूनमभ्येति सत्कीर्त्तिशुक्लांशुका॥" ह०।

तथा च भागवते ४।७।४४,

"स प्रसीद त्वमस्माकमाकाङ्क्षतां, दर्शनं ते परिभ्रष्टसत्कर्म्मणाम्।
कीर्त्त्यमाने नृभिर्नाम्नि यज्ञेश ते, यज्ञविघ्नाः क्षयं यान्ति तस्मै नमः॥"

५। मत्तमातङ्गलीलाकरो नाम दण्डकः सप्तविंशत्यक्षरस्तदधिकाक्षरो वा, यथा—

"हेमगौरे वसानोऽंशुके शक्रनीलासिते वर्ष्मणि स्पष्टदिव्यानुलेपाङ्कितः,
तारहारांशुवक्षो नभश्चित्रमालाञ्चितो भव्यभूषोज्ज्वलाङ्गः समं सीरिणा।
अञ्जनाभाम्बरेणेन्दुकुन्दाभदेहेन लीलापरीहासहासोर्म्मिकौतूहलैः,
कंसरङ्गाद्रिगः पातु नश्चक्रपाणिर्गतिक्रीड़या मत्तमातङ्गलीलाकरः॥" ग०।

(छ) तगणवर्गः। सां (— — ⏑)।

१। पञ्चालस्त्र्यक्षरो, यथा—

"सो देउ, सुक्खाइँ। संहारि, दुक्खाइँ॥" प्रा०।

२। हारीतोऽन्त्यलघुहीनः पञ्चाक्षरो, यथा—

"जा भत्तिजुत्ता, धम्मेक्कचित्ता। सा होइ णारी, धसा पिआरी॥" प्रा०।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

३ । मन्थानः षड़क्षरो, यथा—

"राआ जँहा लुद्ध, पंडित्तहो मुद्ध ।
कित्ती करे थप्प, सोराज्ज उप्पेक्ख ॥" प्रा० ।

४ । विध्वङ्कमालान्त्यलघुविहीनैकादशाक्षरा, यथा—

"नासावधापत्रपाज्ञाविनोदी," रामकृष्णविलोमकाव्ये ।

५ । सारङ्गो द्वादशाक्षरो, यथा—

"रे गोड़ थक्कंतु ते हत्थिजूथाइँ, पल्लट्टि वज्जंतु पाइक्कजूथाइँ ।
कासीसराआ सरासारअग्गेण, की हत्थि को पत्ति की वीरवग्गेण ॥" प्रा० ।

६ । कामबाणाभिधदण्डकस्यान्त्यलघुहीनस्य ऊनत्रिंशदक्षरस्य लक्षणमेव दृश्यते, दर्शितञ्च तत् १०४ पृष्ठे ।

(ज) सगणवर्गः । सां (⏑ ⏑ —) । पाश्चात्त्यनाम Ănapĕst.

१ । रमणस्त्र्यक्षरो, यथा—

"ससिणा, रअणी । पइणा, तरुणी ॥" प्रा० ।

२ । डीनं षड़क्षरं, यथा—

"पिअभत्ति पिआ, गुणमन्त सुआ । धणजुत्त घरा, बहु-सुक्खकरा ॥" प्रा० ।

३ । तोटकं द्वादशाक्षरं, यथा—

"त्यज तोटकमर्थनियोगकरं, प्रमदाधिकृतं व्यसनोपहतम् ।
उपधाभिरशुद्धमतिं सचिवं, नरनायकभीरुकमायुधिकम् ॥" हृ० ।

तथा च रघुवंशे ८।५१,

"स तथेति विनेतुरुदारमतेः, प्रतिगृह्य वचो विससर्ज मुनिम् ।
तदलब्धपदं हृदि शोकघने, प्रतियातमिवान्तिकमस्य गुरोः ॥"

४ । भ्रमरावली नलिनी वा पञ्चदशाक्षरा, यथा—

"तुअ देव दुरित्त-गणा-हरणा चरणा, जइ पाअउ चंदकला-भरणा सरणा ।
परिपूजउँ तेज्जिअ लोभमणा भमणा, सुह पेक्खिउ लोकविणासमणा समणा ॥"
प्रा० ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

५। दुर्म्मिलं चतुर्विंशत्यचरं, यथा—
"पइ दिज्जिअ रज्जअ-टोप्पर मत्थअ कंकण बाहु किरीट सिरे,
पहि कसहि कुंडल नू रइमंडल ठाविअ हार फुरंत उरे।
पइ अंगुलि मुद्दहि-हीरहि सुंदरिकंचणरज्जु सुमज्झतणू,
तसु तूणउ सुंदर किज्जअ मंदर तावह वाणह सेसधणू॥" प्रा०।

६। कुसुमस्तवकाख्यो दण्डकः सप्तविंशत्यचरस्तदधिकाचरो वा, यथा—
"विरराज यदीयकरः कनकद्युतिबन्धुरवामदृशः कुचकुड्मलगो,
भ्रमरप्रकरेण यथावृतमूर्त्तिरशोकलताविलसत्कुसुमस्तवकः।
स नवीनतमालदलप्रतिमच्छवि बिभ्रदतीव विलोचनहारि वपुः,
चपलारुचिरांशुकवल्लिधरो हरिरस्तु मदीयहृदम्बुजमध्यगतः॥" ग०।

(झ) जगणवर्गः। सां (‿ — ‿)। पाश्चात्यनाम Ămphibrăch.

१। मृगेन्द्रस्त्र्यचरो, यथा—"दुरंत, वसंत। सुकंत, दिगंत॥" प्रा०।

२। मालती षड़चरा, यथा—
"करा पसरंत, बहुगुणमंत। पफुल्लिअ कुंद, उगू सहि चंद॥" प्रा०।

३। मौक्तिकदाम द्वादशाचरं, यथा—
"कआ भअ दुव्वर तेज्जि गरास, खणो खण जाणिअ दीह णिसास।
कुहूरव ताव दुरंत वसंत, कि णिट्ठुअ काम कि णिट्ठुअ कंत॥" प्रा०।

(ञ) भगणवर्गः। सां (— ‿ ‿)। पाश्चात्यनाम Dăctўl.

१। मन्दरस्त्र्यचरो, यथा—"सो हर, तोहर। संकट संहर॥" प्रा०।

२। मोदकं द्वादशाचरं, यथा—
"गज्जउ मेह कि अंमर सामर, फुल्लउ णीव कि भम्मउ भामर।
एक्कल जीअ पराहिण अम्मह, कीलउ पाउस कीलउ मम्मह॥" प्रा०।

३। मदिरान्त्यलघुद्वयहीना द्वाविंशत्यचरा, यथा—
"माधवमासि विकस्वरकेसरपुष्पलसन्मदिरामुदितैः,
भृङ्गकुलैरुपगीतवने वनमालिनमालि कलानिलयम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कुञ्जगृहोदरपल्लवकल्पिततल्पमनल्पमनोजरसम्,
तं भज माधविकामृदुनर्त्तनयामुनवातकृतोपगमा ॥" ग० ।

४ । किरीटं चतुर्विंशत्यक्षरं, यथा—

"वप्पअ उक्कि सिरे जिणि लिज्जिअ तेज्जिअ रज्ज वणंत चले विणु
सोअर सुंदरि संगहि लज्जिअ एक्कलि मारु विराध-कवंधअ ।
संगक मारुइ मिल्लअ वालि वहिल्लिअ रज्ज सुगीवह दिज्जअ,
वद्ध समुद्द विणासिअ रावण सो तुअ राहव दिज्जउ णिब्भअ ॥" प्रा० ।

द्वितीयोऽध्यायः ।

अथ मिश्रवर्गः ।

१ । मिश्रवर्ग एतैरेव दशभिर्वर्गैः । एतेषां दशसंख्यकवर्गाणां मध्ये यैः कैश्चिदपि अन्योन्ययोगैः सममात्रकादेशेन वा बहूनि छन्दांस्युत्पद्यन्ते ।

अथ कोऽयं सममात्रकादेश इत्यत्रोच्यते—गुरोरेकस्य स्थाने लघुद्वयस्य, लघुद्वयस्य स्थाने गुरोरेकस्य वा, एकचतुष्कलगणस्य स्थानेऽपरचतुष्कलगणस्य च सन्निवेशः सममात्रकादेशः । तथैव पञ्चकलगणस्येति ।

२ । अन्योन्य-योगोदाहरणम् । नाराचकमष्टादशाक्षरं—षड्लघ्वक्षर-दमनकेन सह चतूरेफस्रग्विण्या योगात् निष्पन्नम्, यथा रघुवंशे, १२।१०४।

६ला: र र र र

"रघुपतिरपि जातवेदोविशुद्धां प्रगृह्य प्रियां,
प्रियसुहृदि विभीषणे सङ्गमय्य श्रियं वैरिणः ।
रविसुतसहितेन तेनानुयातः ससौमित्रिणा,
भुजविजितविमानरत्नाधिरूढः प्रतस्थे पुरीम् ॥"

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

२। सममात्रकादेशोदाहरणम्। भागवते दशमस्कन्धे पञ्चत्रिंशेऽध्याये, (२-२५)।

"वामबाहुकृतवामकपोलो, वल्गितभ्रुरधरार्पित-वेणुम्।
कोमलाङ्गुलिभिराश्रितमार्गं, गोप्य ईरयति यत्र मुकुन्दः॥ २॥
व्योमयानवनिताः सह सिद्धै-र्विस्मितास्तदुपधार्य्य सलज्जाः।
काममार्गण-समर्पित-चित्ताः, कश्मलं ययुरपस्मृतनीव्यः॥ ३॥
हन्त चित्रमबलाः शृणुतेदं, हारहास उरसि स्थिरविद्युत्।
नन्दसूनुरयमार्त्तजनानां, नर्म्मदो यर्हि कूजितवेणुः॥ ४॥ क
वृन्दशो व्रजवृषा मृगगावो, वेणुवाद्यहृतचेतस आरात्।
दन्तदष्टकवला धृतकर्णा, निद्रिता लिखितचित्रमिवासन्॥ ५॥
वर्हिणस्तवकधातुपलाशै-र्बद्धमल्लपरिवर्हविडम्बः।
कर्हिचित्सबल आलि स गोपै-र्गाः समाह्वयति यत्र मुकुन्दः॥ ६॥
तर्हि भग्नगतयः सरितो वै, तत्पदाम्बुजरजोऽनिलनीतम्।
ख स्पृहयतीर्वयमिवाबहुपुण्याः, प्रेमवेपितभुजाः स्तिमितापः॥ ७॥
ख अनुचरैः समनुवर्णितवीर्य्य, आदिपूरुष इवाचलभूतिः।
ख वनचरो गिरितटेषु चरन्ती-र्वेणुनाह्वयति गाः स यदा हि॥ ८॥
ख वनलतास्तरव आत्मनि विष्णुं, व्यञ्जयन्त्य इव पुष्पफलाढ्याः।
ख प्रणतभारविटपा मधुधाराः, प्रेमहृष्टतनवो ववृषुः स्म॥ ९॥
दर्शनीयतिलको वनमाला-दिव्यगन्धतुलसीमधुमत्तैः।
ख अलिकुलैरलघु गीतमभीष्टम्, आद्रियन् यर्हि सन्धितवेणुः॥ १०॥ क
सरसि सारसहंसविहङ्गा-श्चारुगीतहृतचेतस एत्य।
हरिमुपासत ते यतचित्ता, हन्त मीलितदृशो धृतमौनाः॥ ११॥
ख सहबलः स्रगवतंसविलासः, सानुषु क्षितिभृतो व्रजदेव्यः।
क हर्षयन् यर्हि वेणुरवेण, जातहर्ष उपरम्भति विश्वम्॥ १२॥
ख महदतिक्रमणशङ्कितचेता, मन्दमन्दमनु गर्ज्जति मेघः।
ग सुहृदमभ्यवर्षत् सुमनोभि-श्छायया च विदधत्प्रतपत्रम्॥ १३॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ख विविधगोपचरणेषु विदग्धो, वेणुवाद्य उरुधा निजशिक्षा ।
तव सुतः सति यदाधरबिम्बे, दत्तवेणुरनयत् स्वरजातीः ॥ १४ ॥
ख सवनशस्तदुपधार्य्य सुरेशाः, शक्रशर्व्वपरमेष्ठिपुरोगाः ।
कवय आनतकन्धरचित्ताः, कश्मलं ययुरनिश्चिततत्त्वाः ॥ १५ ॥
निजपदाब्जदलैर्ध्वजवज्र-नीरजाङ्कुशविचित्रललामैः ।
व्रजभुवः शमयन् खुरतोदं, वर्ष्मधुर्य्यगतिरीड़ितवेणुः ॥ १६ ॥
व्रजति तेन वयं सविलास-वीक्षणार्पितमनोभववेगाः ।
कुजगतिं गमिता न विदामः, कश्मलेन कवरं वसनं वा ॥ १७ ॥
मणिधरः क्वचिदागणयन् गा, मालया दयितगन्धतुलस्याः ।
प्रणयिनोऽनुचरस्य कदांसे, प्रक्षिपन् भुजमगायत यत्र ॥ १८ ॥
ख क्वणितवेणुरववञ्चितचित्ताः, कृष्णमन्वसत कृष्णगृहिण्यः ।
ख गुणगणार्णमनुगत्य हरिण्यो, गोपिका इव विमुक्तगृहाशाः ॥ १९ ॥
कुन्ददामकृतकौतुकवेषो, गोपगोधनवृतो यमुनायाम् ।
नन्दसूनुरनघे तव वत्सो, नर्म्मदः प्रणयिनां विजहार ॥ २० ॥
मन्दवायुरुपवात्यनुकूलं, मानयन् मलयजस्पर्शेन । क
वन्दिनस्तमुपदेवगणा ये, वाद्यगीतबलिभिः परिवव्रुः ॥ २१ ॥
वत्सलो व्रजगवां यदगध्रो, वन्द्यमानचरणः पथि वृद्धैः ।
कृत्स्नगोधनमुपोह्य दिनान्ते, गीतवेणुरनुगीड़ितकीर्त्तिः ॥ २२ ॥
उत्सवं श्रमरुचापि दृशीना-मुन्नयन् खुररजश्छुरितस्रक् ।
दित्सयैति सुहृदाशिष एष, देवकीजठरभूरुडुराजः ॥ २३ ॥
मदविघूर्णितलोचन ईषत्, मानदः स्वसुहृदां वनमाली ।
ख बदरपाण्डुवदनो मृदुगण्डं, मण्डयन् कनककुण्डललक्ष्म्या ॥ २४ ॥
ख यदुपतिर्द्दिरदराजविहारो, यामिनीपतिरिवैष दिनान्ते ।
ख मुदितवक्त्र उपयाति दुरन्तं, मोचयन् व्रजगवां दिनतापम् ॥ २५ ॥"

एषां चतुर्विंशति-श्लोकानां २, ३, ५, ६, २०, २२, २३ इति सप्त श्लोका एव विशुद्धाः स्वागतालक्षणाः । तल्लक्षणमग्रे द्रष्टव्यम् । शेषेषु सप्तदश-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

श्लोकेषु क्वचिद्विलघुस्थाने गुरोरेकस्यादेशेन (४, २१) दशाक्षरपादो (क) जायते, क्वचिद्गुरुस्थाने लघ्वोरादेशेन (७, ८, ९, १३, १४, १५, १९, २४, २५) द्वादशाक्षरपादश्च (ख), क्वचिदेकादशाक्षरपादेऽपि (१३) लघुगुरु-क्रम-विपर्य्यासो (ग) दृश्यते। क्वचिदेकस्मिन् पादे द्वादशाक्षराण्यन्यस्मिन् पादे दशाक्षराणि च वर्त्तन्ते (१०, १२)।

४। मिश्र-वर्गीयाणां कतिपय-सुप्रसिद्धानि छन्दांसि अत्रोदाह्रियन्ते।

दोधकमेकादशाक्षरञ्चतुर्भकारमोटकस्य अन्त्यलघुद्वयस्थाने एकगुरोरादेशेन, यथा,—

"या न ययौ प्रियमन्यवधूभ्यः, सा रतरागमनायतमानम्।
तेन सहेह बिभर्त्ति रहः स्त्री, सारतरागमनायत मानम्॥" माघे, ४।४५।

"इत्थममुं विलपन्तममुञ्च-द्दीनदयालुतयावनिपालः।
रूपमदर्शि धृतोऽसि यदर्थं, गच्छ यथेच्छमथेत्यभिधाय॥" नैषधे, १।४३।

५। स्वागतैकादशाक्षरा, दोधकस्य तृतीयचतुर्थयोर्वर्णयोरन्योन्य-विनिमयेन, यथा रघुवंशे,

"कुम्भपूरणभवः पटुरुच्चै-रुच्चचार निनदोऽम्भसि तस्याः।
तत्र स द्विरदवृंहितशङ्की शब्दपातिनमिषुं विससर्ज॥" ९।७३।

६। रथोद्धता चैकादशाक्षरा, स्वागताया नवमदशमयोर्वर्णयोरन्योन्य-विनिमयेन, यथा रघुवंशे,

"तौ पितुर्नयनजेन वारिणा, किञ्चिदुक्षित-शिखण्डकावुभौ।
धन्विनौ तमृषिमन्वगच्छतां, पौरदृष्टिकृत-मार्गतोरणौ॥" ११।५।

७। द्रुतविलम्बितं द्वादशाक्षरं, मोटकस्याद्यान्त्ययोर्वर्णयोरन्योन्य-विनिमयेन, यथा रघुवंशे,

"न कृपणा प्रभवत्यपि वासवे, न वितथा परिहासकथास्वपि।
न च सपत्नजनेष्वपि तेन वा-गपरुषा परुषाक्षरमीरिता॥" ९।५।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

८। इन्द्रवज्रैकादशाक्षरा, गुरुद्वयान्ता ततजयुता, यथा शकु०,
"अर्थो हि कन्या परकीय एव, तामद्य सम्प्रेष्य परिग्रहीतुः ।
जातो ममायं विशदः प्रकामं, प्रत्यर्पितन्यास इवान्तरात्मा ॥" चतुर्थेऽङ्के ।

९। उपेन्द्रवज्रा चैकादशाक्षरा, गुरुद्वयान्ता जतजयुता, यथा कुमारसम्भवे ७।१।

"अथौषधीनामधिपस्य वृद्धौ, तिथौ च जामित्रगुणान्वितायाम् ।
समेतबन्धुर्हिमवान्सुतायाः, विवाह-दीक्षा-विधिमन्वतिष्ठत् ॥"

तथा च जयदेवस्य गीतगोविन्दे, ४स० २० ।

"स्मरातुरां दैवतवैद्यहृद्य, त्वदङ्ग-सङ्गामृत-मात्र-साध्याम् ।
विमुक्त-बाधां कुरुषे न राधा-मुपेन्द्रवज्रादपि दारुणोऽसि ॥"

१०। "अनन्तरोदीरितलक्ष्मभाजौ, पादौ यदीयावुपजातयस्ताः ।"
तासां नामानि पृथग्लक्षणानि च पूर्व्वमुक्तानि, ७० पृष्ठे । तत्रस्थ-संख्यानुक्रमेण अत्रस्थोदाहरणानि च बोद्धव्यानि, यथा कुमारसम्भवे प्रथमसर्गे,

(१) "स मानसीं मेरुसखः पितॄणां, कन्यां कुलस्य स्थितये स्थितिज्ञः ।
मेनां मुनीनामपि माननीयाम्, आत्मानुरूपां विधिनोपयेमे ॥ १८ ॥

(२) यः पूरयन् कीचकरन्ध्रभागा-न्दरीमुखोत्थेन समीरणेन ।
उद्गास्यतामिच्छति किन्नराणां, तानप्रदायित्वमिवोपगन्तुम् ॥ ८ ॥

(३) कपोलकण्डूः करिभिर्विनेतुं, विघट्टितानां सरलद्रुमाणाम् ।
यत्र स्रुतक्षीरतया प्रसूतः, सानूनि गन्धः सुरभीकरोति ॥ ९ ॥

(४) उद्वेजयत्यङ्गुलिपार्ष्णिभागा-न्मार्गे शिलीभूतहिमेऽपि यत्र ।
न दुर्वहश्रोणिपयोधरार्त्ता, भिन्दन्ति मन्दां गतिमश्वमुख्यः ॥ ११ ॥

(५) पदं तुषारस्रुतिधौतरक्तं, यस्मिन्न दृष्ट्वापि हतद्विपानाम् ।
विदन्ति मार्गं नखरन्ध्रमुक्तै-र्मुक्ताफलैः केशरिणां किराताः ॥ ६ ॥

(६) सा राजहंसैरिव सन्नताङ्गी, गतेषु लीलाञ्चित-विभ्रमेषु ।
व्यनीयत प्रत्युपदेशलुब्धै-रादित्सुभिर्नूपुरशिञ्जितानि ॥ ३४ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(७) तया दुहित्रा सुतरां सवित्री, स्फुरत्प्रभामण्डलया चकाशे।
विदूरभूमिर्नवमेघशब्दा-दुद्भिन्नया रत्नशलाकयेव॥ २४॥

(८) यं सर्वशैलाः परिकल्प्य वत्सं, मेरौ स्थिते दोग्धरि दोहदक्षे।
भास्वन्ति रत्नानि महौषधीश्च, पृथूपदिष्टां दुदुहुर्धरित्रीम्॥ २॥

(९) दिवाकराद्रक्षति यो गुहासु, लीनं दिवाभीतमिवान्धकारम्।
क्षुद्रेऽपि नूनं शरणं प्रपन्ने, ममत्वमुच्चैःशिरसां सतीव॥ १२॥

(१०) अस्त्युत्तरस्यां दिशि देवतात्मा, हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनिधी वगाह्य, स्थितः पृथिव्या इव मानदण्डः॥ १॥

(११) अनन्तरत्नप्रभवस्य यस्य, हिमं न सौभाग्यविलोपि जातम्।
एको हि दोषो गुणसन्निपाते, निमज्जतीन्दोः किरणेष्विवाङ्कः॥ ३॥

(१२) यश्चाप्सरोविभ्रममण्डनानां, सम्पादयित्रीं शिखरैर्बिभर्त्ति।
वलाहकच्छेदविभक्त-रागा-मकालसन्ध्यामिव धातुमत्ताम्॥ ४॥

(१३) प्रसन्नदिक् पांशुविविक्तवातं, शङ्खस्वनानन्तरपुष्पवृष्टि।
शरीरिणां स्थावरजङ्गमानां, सुखाय तज्जन्मदिनं बभूव॥ २३॥

(१४) यत्रांशुकाक्षेपविलज्जितानां, यदृच्छया किम्पुरुषाङ्गनानाम्।
दरीगृहद्वार-विलम्बिबिम्बा-स्तिरस्करिण्यो जलदा भवन्ति॥ १४॥
पर्य्याप्तपुष्पस्तवकस्तनाभ्यः, स्फुरत्प्रबालोष्ठमनोहराभ्यः।
लतावधूभ्यस्तरवोऽप्यवापु-र्विनम्रशाखाभुजबन्धनानि॥" ३।३९॥

११। शालिनी चैकादशाक्षरा, यकारद्वयान्ता पञ्चगुर्व्वाद्या, यथा रघुवंशे, ९।६४।

"निर्घातोग्रैः कुञ्जलीलान् जिघांसु-र्ज्यानिर्घोषैः क्षोभयामास सिंहान्।
नूनं तेषामभ्यसूयापरोऽभू-द्वीर्य्योदग्रे राजशब्दे मृगेषु॥"

१२। वंशस्था द्वादशाक्षरा, रेफान्ता जतजयुता, यथा रघुवंशे,
"उमावृषाङ्कौ शरजन्मना यथा, यथा जयन्तेन शचीपुरन्दरौ।
तथा नृपः सा च सुतेन मागधी, ननन्दतुस्तत्सदृशेन तत्समौ॥"३।२३॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तथा च वररुचेः नीतिरत्ने १४,

"वरं वनं व्याघ्रगजेन्द्रसेवितं, द्रुमालयः पत्रफलाम्बुभोजनम् ।
तृणानि शय्या वसनञ्च वल्कलम्, न बन्धुमध्ये धनहीनजीवनम् ॥"

१३ । इन्द्रवंशा च द्वादशाक्षरा, रेफान्ता ततजयुता, यथा माघे १५।८५।

"सम्प्रत्युपेयाः कुशली पुनर्युधः, सस्नेहमाशीरिति भर्त्तुरीरिता ।
सद्यः प्रसह्य द्वितयेन नेत्रयोः, प्रत्याचचक्षे गणता भटस्त्रियाः ॥"

१४ । प्रमिताक्षरा च द्वादशाक्षरा, तोटकस्य पञ्चम-षष्ठयोर्वर्णयोरन्योन्यविनिमयेन, यथा शिशुपालवधे, ९।६।

"प्रतिकूलतामुपगते हि विधौ, विफलत्वमेति बहुसाधनता ।
अवलम्बनाय दिनभर्त्तुरभू-न्न पतिष्यतः करसहस्रमपि ॥"

१५ । सर्व्वेषु मात्रासमकेषु तोटकस्य केषाञ्चिद्वर्णानां सममात्रकादेश उपलभ्यते । यथा गीतगोविन्दे,

१ १ ३ ३ ३ १ २
"स्तनविनिहितमपि हारमुदारम् । सा मनुते कृशतनुरिव भारम् ॥
१ १ १ २ ३ १ १ २
सरसमसृणमपि मलयजपङ्कम् । पश्यति विषमिव वपुषि सशङ्कम् ॥
१ १ १ २ १ १ १ २
श्वसितपवनमनुपमपरिणाहम् । मदनदहनमिव वहति सदाहम् ॥
१ १ १ २ १ १ १ २
दिशि दिशि किरति सजलकणजालम् । नयननलिनमिव विगलितनालम् ॥ ४स० ।
पश्यति दिशि दिशि रहसि भवन्तम् । तदधरमधुरमधूनि पिबन्तम् ॥
त्वदभिसरणरभसेन वलन्ती । पतति पदानि कियन्ति चलन्ती ॥
विहितविशदविशकिशलयवलया । जीवति परमिह तव रतिकलया ॥
मुहुरवलोकितमण्डललीला । मधुरिपुरहमिति भावनशीला ॥
त्वरितमुपैति न कथमभिसारम् । हरिरिति वदति सखीमनुवारम् ॥
श्लिष्यति चुम्बति जलधरकल्पम् । हरिरुपगत इति तिमिरमनल्पम् ।
भवति विलम्बिनि विगलितलज्जा । विलपति रोदिति वासकसज्जा ॥
श्रीजयदेवकवेरिदमुदितम् । रसिकजनं तनुतामतिमुदितम् ॥ ६स० ।
स्मरसमरोचितविरचितवेशा । गलितकुसुमदरविलुलितकेशा ॥
हरिपरिरम्भणवलितविकारा । कुचकलशोपरितरलितहारा ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

विचलदलकललितानचन्द्रा । तदधरपानरभसकृततन्द्रा ॥
चञ्चलकुण्डलदलितकपोला । मुखरितरसनजघनगतिलोला ॥
दयितविलोकितलज्जितहसिता । बहुविधकूजितरतिरसरसिता ॥
विपुलपुलकपृथुवेपथुभङ्गा । श्वसितनिमीलितविकसदनङ्गा ॥
श्रमजलकणभरसुभगशरीरा । परिपतितोरसि रतिरणधीरा ॥
श्रीजयदेवभणितहरिरमितम् । कलिकलुषं जनयतु परिशमितम् ॥ ७स० ।
हरिरभिसरति वहति मधुपवने । किमपरमधिकसुखं सखि भवने ॥
तालफलादपि गुरुमतिसरसम् । किं विफलीकुरुषे कुचकलसम् ॥
कति न कथितमिदमनुपदमचिरम् । मा परिहर हरिमतिशयरुचिरम् ॥
किमिति विषीदसि रोदिषि विकला । विहसति युवतिसभा तव सकला ॥” ९स० ।

अत्र (१) इति चिह्नेन गुरोरेकस्य स्थाने लघुद्वयस्य, (२) लघुद्वयस्य स्थाने गुरोरेकस्य, (३) सगणस्य स्थानेऽपरचतुष्कलगणस्य चादेशो ज्ञायते ।

१६ । जलोद्धतगतिर्द्वादशाक्षरा, द्विरावृत्त-जगणसगणा, यथा माघे—

ज स ज स

“समीरशिशिरः शिरःसु वसतां, सतां जवनिका निकामसुखिनाम् ।
बिभर्त्ति जनयन्नयं मुदमपा-मपायधवलावलाहकततीः ॥” ४।५४।

१७ । पृथ्वी सप्तदशाक्षरा, जलोद्धतगतौ अन्त्यगुरुहीनयकारद्वययुता, यथा भर्त्तृहरेर्नीतिशतके, ३ ।

“लभेत सिकतासु तैलमपि यत्नतः पीड़यन्,
पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः ।
कदाचिदपि पर्य्यटन् शशविषाणमासादये-
न्न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥”

१८ । प्रहर्षिणी त्रयोदशाक्षरा, गुरुद्वयान्ता त्रिगुरु-चतुर्लघु-गुरुलघु-गुरुलघुयुता, यथा रघुवंशे, १२।७९।

“क्रोशार्द्धं प्रकृतिपुरःसरेण गत्वा, काकुत्स्थः स्तिमितजवेन पुष्पकेण ।
शत्रुघ्नप्रतिविहितोपकार्य्यमार्य्यः, साकेतोपवनमुदारमध्युवास ॥”

१९ । रुचिरा त्रयोदशाक्षरा, प्रमाणीवर्गीय-द्वादशाक्षर-पञ्चचामराख्य-वृत्तस्य गुरुषष्ठाक्षरस्थाने लघुद्वयस्यादेशेन, यथाभिज्ञानशकुन्तलसंमाप्तौ ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

"प्रवर्त्ततां प्रकृतिहिताय पार्थिवः, सरस्वती श्रुतमहतां महीय्यताम् ।
ममापि च क्षपयतु नीललोहितः, पुनर्भवं परिगतशक्तिरात्मभूः ॥"

२० । कनकप्रभा मञ्जुभाषिणी वा त्रयोदशाक्षरा, रुचिराया द्वितीयाक्षरस्य तृतीयेन, चतुर्थस्य पञ्चमेन च विनिमयात्, यथा रघुवंशे, ९।६९।

"इति विस्मृतान्यकरणीयमात्मनः, सचिवावलम्बितधुरं धराधिपम् ।
परिवृद्धरागमनुबन्धसेवया, मृगया जहार चतुरेव कामिनी ॥"

२१ । मत्तमयूरञ्च त्रयोदशाक्षरं, पञ्चगुरु-सम्मोहरूपया द्विरावृत्त-लघुद्वयगुरुद्वय इत्यष्टाक्षराणां योगेनोपलभ्यते । एभिरष्टाक्षरैरपि पिङ्गलाचार्य्योऽन्यतमं वितानाख्यं वृत्तमुदाहरत् । यथा—

"हृदयं यस्य विशालं, गगनाभोगसमानम् ।
लभतेऽसौ मणिचित्रं, नृपतिर्मूर्द्ध्नि वितानम् ॥" ह० ।

मत्तमयूरोदाहरणं रघुवंशे, ९।७५ ।

"हा तातेति क्रन्दितमाकर्ण्य विषण्ण-स्तस्यान्विष्यन् वेतसगूढं प्रभवं सः ।
शल्यप्रोतं प्रेक्ष्य सकुम्भं मुनिपुत्रं, तापादन्तःशल्य इवासीत् क्षितिपोऽपि ॥"

२२ । वसन्ततिलका चतुर्द्दशाक्षरा, गुरुद्वयान्ता तकार-भकार-जकार-द्वययुता, यथा रघुवंशे, ५।६६।

"रात्रिर्गता मतिमतां वर मुञ्च शय्यां, धात्रा द्विधैव ननु धूर्ज्जगतो विभक्ता ।
तामेकतस्तव बिभर्त्ति गुरुर्विनिद्र-स्तस्या भवानपरधुर्य्यपदावलम्बी ॥"

२३ । मालिनी पञ्चदशाक्षरा, यकारद्वयान्ता षड्लघु-त्रिगुरुयुता, यथा रघुवंशे, ६।८५।

"शशिनमुपगतेयं कौमुदी मेघमुक्तं, जलनिधिमनुरूपं जह्नुकन्यावतीर्णा ।
इति समगुणयोगप्रीतयस्तत्र पौराः, श्रवणकटु नृपाणामेकवाक्यं विवव्रुः ॥"

२४ । मन्दाक्रान्ता सप्तदशाक्षरा, गुरुद्वयान्ता चतुर्गुरु-पञ्चलघु-तकार-द्वययुता, यथा वररुचेर्नीतिरत्ने, १५ ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

"साध्वीस्त्रीणां दयितविरहे मानिनां मानभङ्ग,
सल्लोकानामपि जनरवे निग्रहे पण्डितानाम् ।
अन्योद्रेके कुटिलमनसां निर्गुणानां विदेशे,
भृत्याभावे भवति मरणं हन्त सम्भावितानाम् ॥"

२५ । शिखरिणी च सप्तदशाक्षरा, लघ्वाद्या पञ्चगुरु-पञ्चलघु-तकार-सकारयुता, यथा उत्तरचरिते, प्रथमेऽङ्के ।

"अथेदं रक्षोभिः कनकहरिणच्छद्मविधिना,
तथा वृत्तं पापैर्व्यथयति यथा क्षालितमपि ।
जनस्थाने शून्ये विकलकरणैरार्य्यचरिते-
रपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम् ॥"

२६ । हरिणी च सप्तदशाक्षरा, गुर्व्वन्ता पञ्चलघु-पञ्चगुरु-जकारद्वय-युता, यथा रघुवंशे, ३।७० ।

"अथ स विषयव्यावृत्तात्मा यथाविधि सूनवे,
नृपतिककुदं दत्त्वा यूने सितातपवारणम् ।
मुनिवनतरुच्छायां देव्या तया सह शिश्रिये,
गलितवयसामिक्ष्वाकुणामिदं हि कुलव्रतम् ॥"

२७ । शार्द्दूलविक्रीड़ितमेकोनविंशत्यक्षरं, मसजसततकारद्वययुतं गुर्व्वन्तञ्च, यथा भर्त्तृहरेर्नीतिशतके, ४७ ।

"एते सत्पुरुषाः परार्थघटकाः स्वार्थं परित्यज्य ये,
सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये ।
तेऽमी मानुषराक्षसाः परहितं स्वार्थाय विघ्नन्ति ये,
ये तु घ्नन्ति निरर्थकं परहितं ते के न जानीमहे ॥"

२८ । स्रग्धरैकविंशत्यक्षरा, गुरुचतुष्टय-यकार-पञ्चलघु-यकारत्रययुता, यथाभिज्ञानशकुन्तलप्रारम्भे ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

"या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री,
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम् ।
यामाहुः सर्व्ववीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः,
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः ॥"

२९। चण्डवृष्टिप्रपातो नाम दण्डकः सप्तविंशत्यक्षरः, षड्लघ्वाद्यः सप्तरेफान्तश्च, यथा—

"इह हि भवति दण्डकारण्यदेशे स्थितिः पुण्यभाजां मुनीनां मनोहारिणी,
त्रिदशविजयिवीर्य्यदृप्ताद्दशग्रीवलक्ष्मीविरामेण रामेण संसेविते ।
जनकयजनभूमिसम्भूतसीमन्तिनीसीमसीतापदस्पर्शपूताश्रमे,
भुवननमितपादपद्माभिधानाम्बिकातीर्थयात्रागतानेकसिद्धाकुले ॥" वृ० ।

३०। प्रचितो नाम दण्डको, रेफोपलक्षिताक्षरत्रयेण वर्द्धितो, यथा—

"प्रथमकथितदण्डकश्चण्डवृष्टिप्रपाताभिधानो मुनेः पिङ्गलाचार्य्यनाम्नो मतः,
प्रचित इति ततः परं दण्डकानामियं जातिरेकैकरेफाभिवृद्ध्या यथेष्टं भवेत् ।
स्वरुचिरचितसंज्ञया तद्विशेषैरशेषैः पुनः काव्यमन्येऽपि कुर्व्वन्तु वागीश्वराः,
भवति यदि समानसङ्ख्याक्षरैर्यत्र पादव्यवस्था ततो दण्डकः पूज्यतेऽसौ जनैः ॥"

वृ० ।

तृतीयोऽध्यायः ।

अथार्द्धसमवृत्तम् ।

१। सुन्दर्य्यपरवक्त्रे द्वे वैतालीयान्तर्गते। द्वयोरप्यन्ते लगौ वर्त्तन्ते, शेषाः षण्मात्रा अयुक्पादे सुन्दर्य्याः सकारलघुयुगैरपरवक्त्रस्य च नकाराभ्यामेव, युक्पादेऽष्टमात्राः सुन्दर्य्याः सकारभकाराभ्यामपरवक्त्रस्य चतुर्लघुभकारैरेव, परिपूर्य्यन्ते ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

२। सर्वेष्वेव वैतालीयेषु एतयोः शेषाणां वर्णानां केषाञ्चिदपि सममात्रकादेश उपलभ्यते। उदाहरणैस्तत् स्फुटीक्रियते, यथा सुन्दर्याः,

"अथ मोहपरायणा सती, विवशा कामवधूर्विबोधिता।
विधिना प्रतिपादयिष्यता, नववैधव्यमसह्यवेदनम्॥" कु० स०, ४।१।

"क्व वयं क्व परोक्षमन्मथो, मृगशावैः सममेधितो जनः।
परिहासविजल्पितं सखे, परमार्थेन न गृह्यतां वचः॥" शकु०, २अं।

"कुसुमैरुपशोभितां सितैर्घनमुक्ताम्बुलवप्रकाशितैः।
मधुनः समवेक्ष्य कालतां, भ्रमरश्चुम्बति यूथिकालताम्॥"

घटकर्परः, १९।

अपरवक्त्रस्य, रामायणे अयोध्याकाण्डे,

"भृशमसुखममर्षिता यदा, बहु विललाप समीक्ष्य राघवम्।
व्यसनमुपनिशाम्य सा महत्, सुतमिव बद्धमवेक्ष्य किन्नरी॥" २०।५५।

"मुरजपणवमेघघोषवद्-दशरथवेश्म बभूव यत्पुरा।
विलपितपरिदेवनाकुलं, व्यसनगतं तदभूत् सुदुःखितम्॥" ३९।४१।

"अनुमतगमना शकुन्तला, तरुभिरियं वनवासबन्धुभिः।
परभृतविरुतं कलं यथा, प्रतिवचनीकृतमेभिरीदृशम्॥" शकु० ४अं।

वैतालीयस्य,

"क्षुत्क्षीणशरीरसञ्चया, व्यक्तीभूतशिरास्थिपञ्जराः।
केशैः परुषैस्तवारयो, वैतालीयतनुं वितन्वते॥" ह०।

३। पुष्पिताग्रा-मालभारिणी-भद्रविराज औपच्छन्दसकान्तर्गताः। पुष्पिताग्राऽपरवक्त्रस्यान्ते, मालभारिणी तु सुन्दर्य्यन्ते, गुरुयुता। मालभारिण्या आद्यलघुद्वयस्थाने गुरोरेकस्यादेशाद्भद्रविराडुत्पद्यते। उदाहरणैस्तत्परिस्फुटीक्रियते, यथा पुष्पिताग्रायाः भागवते, १।९।४२।

"तमिममहमजं शरीरभाजां, हृदि हृदि धिष्ठितमात्मकल्पितानाम्।
प्रतिदृशमिव नैकधार्कमेकं, समधिगतोऽस्मि विधूतभेदमोहः॥"

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

"तुरगखुरहतस्तथाहि रेणुर्विटपविषक्तजलार्द्रवल्कलेषु ।
पतति परिणतारुणप्रकाशः, शलभसमूह इवाश्रमद्रुमेषु ॥" शकु० १अं ।
"कतिपयकुसुमोद्गमः कदम्बः, प्रियतमया परिवर्द्धितो य आसीत् ।
स्मरति गिरिमयूर एष देव्याः, स्वजन इवात्र यतः प्रमोदमेति ॥" उ०च० ।

मालभारिण्याः,

"अपरिक्षतकोमलस्य यावत्, कुसुमस्येव नवस्य षट्पदेन ।
अधरस्य पिपासता मया ते, सदयं सुन्दरि गृह्यते रसोऽस्य ॥" शकु० ३अं ।
"सतड़िज्जलदार्पितं नगेषु, स्वनदम्भोधरभीतपन्नगेषु ।
परिधीररवं जलं दरीषु, प्रपतत्यद्भुतरूपसुन्दरीषु ॥" घटकर्परः, ४ ।
"व्यपवर्त्तत एष बालवीरः, पृतनानिर्मथनात्त्वयोपहूतः ।
स्तनयित्नुरवादिभावलीनामवमर्द्दादिव दृप्तसिंहशावः ॥" उ० च० ।

भद्रविराज उदाहरणं ५७ पृष्ठे दर्शितम् ।

४ । सर्व्वत्रैवौपच्छन्दसके एतेषां शेषवर्णानां केषाञ्चिदपि सममात्रकादेश उपलभ्यते । यथा घटकर्परकृतयमककाव्ये, १८ ।

"तरुवर विनताऽस्मि ते सदाहं, हृदयं मे प्रकरोषि किं सदाहम् ।
तव कुसुमनिरीक्षणे पदेहं विसृजेयं सहसैव नीपदेहम् ।"

चतुर्थोऽध्यायः ।

—oo—

अथ विषमवृत्तम् ।

१ । विषमवृत्तेष्वनुष्टुबेव बहुलप्रयोगा । तस्या भेदाः सविस्तरं द्वितीयेऽंशे तृतीयेऽध्याये प्रदर्शिताः ।

२ । आर्य्याभेदाश्च विषमवृत्तानुरूपाः । ते च प्रथमेऽंशे द्वितीयेऽध्याये पैङ्गलसूत्रग्रन्थानुमताः हलायुधवृत्त्यनुमताश्च सङ्कलिताः । पैङ्गलप्राकृतग्रन्थे तु तद्भेदानां कतिपया अभिन्नलक्षणा भिन्ननामान एव दृश्यन्ते, यथा पथ्यार्य्याया नामान्तरमेव गाहा, उपगीतेर्गाहू, उद्गीतेर्विगगाहा, गीतेरुग्गाहा, आर्य्यागीतेश्च खन्धेति ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

३ । परन्तु पैङ्गलप्राकृतग्रन्थगतानां कतिपयमात्राच्छन्दसां नामानि लक्षणानि वा सूत्रग्रन्थे न दृश्यन्ते, यथा गाहिणी, सीहिणी, उक्कच्छा, रोला, गंधा इत्यादयः । संस्कृते उदाहरणप्राप्तावपि वैद्यगङ्गादासेन छन्दोमञ्जर्याख्यग्रन्थे दोहा दोहड़िका-नाम्नाऽवलम्बिता, अत्र ग्रन्थे च २७ पृष्ठे दर्शिता । पज्झटिका नारायणभट्टेन वृत्तरत्नाकरटीकाग्रन्थे पज्झटिका-नाम्ना स्वरूपेणैव गृहीता, गङ्गादासेन तु शाङ्करमोहमुद्गर-प्रयोगानुमतं लक्षणं कृतम् । उभे रूपे च प्रथमेऽंशे चतुर्थेऽध्याये दर्शिते । अन्यान्या बहुतिथमात्राच्छन्दोभेदाः पैङ्गलप्राकृतग्रन्थे सोदाहरणलक्षणा दृश्यन्ते, परन्तु केनचिदपि संस्कृतच्छान्दसिकेन नावलम्बिता, अत्र ग्रन्थे च कलेवरवृद्धिभयान्नोद्धृताः ।

४ । गायत्र्यादित्रिष्टुप्पर्यन्तानि यान्यार्षच्छन्दांसि वैदिकेभ्यो लौकिके गृहीतानि, तान्यपि विषमवृत्तानि ३६ पृष्ठे दर्शितानि ।

५ । सकलान्यपि वैदिकच्छन्दांसि विषमवृत्तानुरूपाणि । अत्र तानि सङ्क्षेपतएव प्रदर्शितानि । पादव्यवस्थादि सविस्तरविवरणं पैङ्गलसूत्रग्रन्थस्य हलायुधवृत्तेश्चाद्याध्यायत्रये, अग्निपुराणे ३२८, ३२९ अध्याययोः, सत्यव्रतसामश्रमिकृतायां मन्त्रब्राह्मण-टीकाभूमिकायाञ्च द्रष्टव्यम् ।

अक्षरसंख्या	छन्दोनामानि
१	दैवी गायत्री
२	„ उष्णिक्
३	„ अनुष्टुप्
४	„ बृहती
५	„ पङ्क्तिः
६	„ त्रिष्टुप् याजुषी गायत्री च
७	याजुषी उष्णिक् दैवी जगती च
८	प्राजापत्या गायत्री याजुष्यनुष्टुप् च
९	याजुषी बृहती आसुरी जगती च

अक्षरसंख्या	छन्दोनामानि
१०	आसुरी त्रिष्टुप् अल्पशः पङ्क्तिः याजुषी पङ्क्तिश्च
११	„ त्रिष्टुप् आसुरी पङ्क्तिश्च
१२	„ बृहती याजुषी जगती प्राजापत्योष्णिक् साम्नी गायत्री च
१३	आसुर्य्यनुष्टुप्
१४	आसुर्य्युष्णिक् साम्नुष्णिक् च
१५	आसुरी गायत्री

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अक्षरसंख्या	छन्दोनामानि
१६	प्राजापत्यानुष्टुप् साम्नी च
१८	आर्ची गायत्री साम्नी बृहती च
१९	पिपीलिकमध्या गायत्री कनीयसी ” पदपङ्क्तिः ”
२०	अक्षरपङ्क्तिः साम्नी पङ्क्तिः प्राजापत्या बृहती पिपीलिकमध्या गायत्री द्विपाद्विराड् ” अतिनिचृद् ”
२१	आर्च्युष्णिक् पादनिचृद्गायत्री अतिपादनिचृद्गायत्री वर्द्धमाना ” प्रतिष्ठा ”
२२	साम्नी त्रिष्टुप् ककुम्मती गायत्री
२३	शङ्कुमती ”

अक्षरसंख्या	छन्दोनामानि
२४	आर्षी गायत्री आर्च्यनुष्टुप् प्राजापत्या पङ्क्तिः साम्नी जगती त्रिपाद्गायत्री नागी ” वाराही ”
२५	पदपङ्क्तिः
२६	पदपङ्क्तिर्गायत्री स्वराड् ” विराडुष्णिक्
२७	न्यङ्कुशिरोष्णिक् आर्ची बृहती
२८	चतुष्पादुष्णिक् ककुबुष्णिक् पुर उष्णिक् परोष्णिक् तनुमध्योष्णिक् प्राजापत्या त्रिष्टुप्
२९	अनुष्टुब्गर्भोष्णिक् पिपीलिकमध्योष्णिक्
३०	आर्ची पङ्क्तिः कविराडनुष्टुप् विराडनुष्टुप्

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अक्षरसंख्या	छन्दोनामानि
२१	महापदपङ्क्तिरनुष्टुप्
	विराडनुष्टुप्
३२	प्राजापत्या जगती
	चतुष्पादनुष्टुप्
	त्रिपादनुष्टुप्
	पिपीलिकमध्यानुष्टुप्
३३	विराड्गायत्री
	आर्ची त्रिष्टुप्
३४	पिपीलिकमध्या बृहती
३६	आर्ची जगती
	आर्षी बृहती
	पथ्या „
	न्यङ्कुसारिणी स्कन्धोग्रीवी
	उरोबृहती वा
	उपरिष्टाद्बृहती
	पुरस्ताद् „
	महाबृहती सतोबृहती वा
	ब्राह्मी गायत्री
३९	विराट्स्थाना त्रिष्टुप्
४०	आर्षी पङ्क्तिः
	पथ्या „
	सतः „
	आस्तार-„
	प्रस्तार- „
	विष्टार- „
	संस्तार- „

अक्षरसंख्या	छन्दोनामानि
४१	विराड्रूपा त्रिष्टुप्
४२	ब्राह्म्युष्णिक्
४३	पुरोज्योतिस्त्रिष्टुप्
	मध्येज्योतिस्त्रिष्टुप्
	उपरिष्टाज्ज्योतिस्त्रिष्टुप्
४४	आर्षी त्रिष्टुप्
	पुरोज्योतिर्जगती
	मध्येज्योति- „
	उपरिष्टाज्ज्योति-„
	अभिसारिणी त्रिष्टुप्
४८	आर्षी जगती
	ब्राह्म्यनुष्टुप्
	षट्पदी जगती
	महासतोबृहती
	महापङ्क्तिः
५२	अतिजगती
५४	ब्राह्मी बृहती
५६	शक्वरी
६०	ब्राह्मी पङ्क्तिः
	अतिशक्वरी
६४	अष्टिः
६६	ब्राह्मी त्रिष्टुप्
६८	अत्यष्टिः
७२	ब्राह्मी जगती
	धृतिः

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अक्षरसंख्या	छन्दोनामानि	अक्षरसंख्या	छन्दोनामानि
७६	अतिधृतिः	९२	विकृतिः
८०	कृतिः	९६	संकृतिः
८४	प्रकृतिः	१००	अभिकृतिः
८८	आकृतिः	१०४	उत्कृतिः

इति घोषकृते छन्दःसारसंग्रहे जातिवृत्तसमाहारो नाम चतुर्थोऽंशः ।

समाप्तश्चायं ग्रन्थः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अकारादि-वर्णक्रमेण सूची।

	पृष्ठे	पङ्क्तौ
अक्षरच्छन्दः	६	१२
अक्षरपङ्क्तिः	६१	१
अचलधृतिः	८९	३
,,	१०७	१४
अतिच्छन्दांसि	७९	१३
अतिजगती	७४	१७
,,	७९	१४
अतिधृतिः	७४	१५
,,	९५	११
अतिरुचिरा	२७	१३
अतिशक्वरी	७४	१६
,,	८४	१६
अतिशायिनी	९१	३
अत्यष्टिः	७४	१६
,,	९०	१
अत्युक्था	५९	८
अद्रितनया	१००	९
अनङ्गक्रीड़ा	२७	१
,, शेखरः	१०३	२१
,, ,,	१०९	१९
अनवसिता	७२	१५
अनुकूला	७२	३
अनुष्टुप्	३७	६
,,	६४	१
अन्योऽन्ययोगः	११४	११
अपरवक्त्रम्	५१	११
,,	१२४	१९

	पृष्ठे	पङ्क्तौ
अपराजिता	८२	१८
अपरान्तिका	१८	२०
अपवाहकः	१०२	१
अभिकृतिः	७४	९
,,	१०१	१५
अमृतगतिः	६८	२२
,, धारा	४५	१५
,, वारि	३१	२०
अर्णः	१०२	१७
अर्णवः	१०२	१७
अर्द्धसमवृत्तम्	३५	१२
,,	५०	२
,,	१२४	१८
अवितथम्	९१	७
अशोकपुष्पमञ्जरी	१०३	१९
,,	१०८	२५
अशोकमञ्जरी	१०३	१८
अश्वगतिः	८७	२१
,,	९५	९
अश्वललितम्	१००	७
अष्टिः	७४	१६
,,	८७	१४
असम्बाधा	८२	१६
आकृतिः	७४	१०
,,	९९	१३
आख्यानकी	५०	१७, १९
,,	७०	२१

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

	पृष्ठे	पङ्क्तौ
आख्यानिकी	५०	१५
,,	७०	२०
आनन्दः	१०३	२
आपातलिका	१७	१६
आपीड़ः	४५	५
आरामः	१०२	१९
आर्द्रा	७०	१९
आर्य्या	७	३
आर्य्यागीतिः	१०	१७
आर्षम्	३६	५
आसारः	१०३	१
इन्दिरा	७२	२३
इन्दुवदना	८२	२३
इन्द्रवंशा	७५	१
,,	१२०	४
इन्द्रवज्रा	६९	२२
,,	११८	१
उक्था	५९	६
उग्गाहा	१२६	२२
उज्ज्वला	७७	५
उत्कृतिः	७४	२
,,	१०१	२०
उत्पलिनी	८०	१५
उद्दामा	१०२	१७
उदीच्यवृत्तिः	१८	११
उद्गता	४७	१३
उद्गीतिः	१०	१३
उद्धर्षणी	८२	११
उपगीतिः	१०	७
उपचित्रकम्	५०	१३
उपचित्रम्	५०	१४
उपचित्रम्	७२	१३
उपचित्रा	२२	४
उपजातिः	७०	६
,,	११८	११
उपमालिनी	८५	२३
उपस्थितम्	७२	११
,,	८१	२
उपस्थितप्रचुपितम्	४८	८
उपस्थिता	६८	१२
उपेन्द्रवज्रा	७०	२
,,	११८	४
उष्णिक्	६२	२१
ऋद्धिः	७०	२१
ऋषभः	८६	१
ऋषभगजविलसितम्	८७	१५
ऋषभविलसितम्	९०	७
एला	८५	२४
औपच्छन्दसकम् (सिकम् वा)	१७	१०
,,	१२६	१३
कनकप्रभा	८०	६
,,	१२२	३
कान्दम्	११०	१६
कान्दः	८०	१९
कान्दुकम्	८०	२२
कन्या	६०	१५
,,	१०५	१३
कमलः	६०	११
,,	६५	६
,,	१०७	६
कमला	६६	११
करहञ्चम्	६३	९

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

	पृष्ठे	पङ्क्तौ
कलहंसः	८२	१
कलिका	४५	१६
कान्ता	६१	१२
कान्तोत्पीड़ा	७६	११
कामः	५६	६
कामक्रीड़ः	१०६	१७
कामक्रीड़ा	८५	७
कामवाणः	१०४	२
,,	११२	६
कासारः	१०३	१
किरीटम्	१०१	१
,,	११४	३
कीर्त्तिः	७०	१६
कुटजगतिः	८२	२
कुटिलम्	८४	६
कुटिलगतिः	८०	१२
कुटिला	८३	१
कुड्मलदन्ती	७२	१
कुपुरुषजनिता	७२	१४
कुमारललिता	६२	२२
कुमारी	८४	६
कुररीरुता	८४	२३
कुसुमविचित्रा	७५	१८
कुसुमस्तवकम्	१०३	१५
,,	११३	६
कुसुमितलताविल्लिता	९२	१८
कृतिः	७४	११
,,	९७	१७
केतुमती	५०	११
केदारः	१०३	१
केसरम्	९३	१०

	पृष्ठे	पङ्क्तौ
कोकिलकम्	९१	६
कौमुदी	५१	१६
क्रौड़चक्रम्	११०	२०
,,	९२	२५
क्रौड़ाचक्रम्	९२	२१
क्रौञ्चपदा	१०१	१६
क्षमा	८७	१४
खञ्जा	५६	११
खन्धा	१२६	२२
गजगतिः	६५	२
गणच्छन्दः	६	१०
गणमात्राच्छन्दसां गुरुलघुसंख्या-निरूपणम्	३४	६
गण्डका	९७	२०
,,	१०८	२०
गरुड़रुतम्	८८	३
गाथा	२९	११
गायत्री	६१	११
गाहा	१२६	२२
गाहु	,,	,,
गीता	९८	१२
गीतिः	१०	१
गीतिका	९८	१६
गीत्यार्य्या	२६	५
,,	१०७	१४
गुर्व्वक्षरवर्गः	१०५	८
गोविन्दः	१०३	२
गौरी	७६	४
,,	८०	११
घारि	६०	१९
,,	१०७	२०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

	पृष्ठे	पङ्क्तौ
चकिता	८९	१, २
चक्रपदम्	८४	११
चञ्चरी	९३	१८
चञ्चरिकावली	८०	१७
चञ्चला	८८	९
,,	१०८	१६
चञ्चलाक्षिका	७६	३
चण्डवृष्टिप्रपात:	१०२	७
,,	१२४	५
चण्डी	८१	१
चतुष्कलगणा:	५	१८
चतुर्वंशा	६१	१५
चन्द्रकान्ता	८७	६
चन्द्रमाला	९७	३
चन्द्ररेखा	८०	१८
चन्द्रलेखा	८४	२२
,,	९३	८
चन्द्रवर्त्म	७७	१
चन्द्रावर्त्ता	८५	९
चन्द्रिका	८०	१५
चन्द्रौरस:	८३	३
चपलार्य्या	८	४
चपलावक्त्रम्	३७	१६
चम्पकमाला	६८	५
चलम्	९५	४
चामरम्	८७	२
,,	१०८	७
चारुहासिनी	१८	१७
चित्रपदा	६४	६
चित्रलेखा	९१	६
,,	९३	९
चित्रलेखा	९५	२
चित्रसंज्ञम्	८८	४, ५
,,	१०८	१६
चित्रा	२२	१
,,	८५	१
चूलिका	२७	४
छन्दोलक्षणम्	१	१५
छाया	९५	२२, २३
जगणवर्ग:	११३	११
जगती	७४	१८
जलधरमाला	७६	१७
जलोद्धतगति:	७६	९
,,	१२१	१३
जाया	७०	१८
जीमूत:	१०२	१७
ज्योति:	२६	११
डौनम्	६२	३
,,	११२	१४
तगणवर्ग:	१११	२१
ततम्	७६	१
तनुमध्या	६१	१२
तन्वी	१००	२३
तरलनयनम्	७७	२१
,,	१०७	११
तामरसम्	७७	६
तारका	८२	३
ताली	५९	१६
,,	१०५	११
तीर्णा	६०	१४
,,	१०५	१३
तुङ्ग:	६५	४

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

	पृष्ठे	पङ्क्तौ
तूणकम्	८७	१
,,	१०८	७
तोटकम्	७५	७
,,	११२	१६
तोमरम्	६७	३
त्रिका गणाः	५	१५
त्रिभङ्गी	१०४	११
त्रिष्टुप्	३६	१६
,,	६९	२१
त्वरितगतिः	६८	२०
दण्डकः	१०२	७
दमनकम्	६२	७
,,	७२	१७
,,	१०७	९
दीपकमाला	६८	१९
दुर्मिलम्	१०१	८
,,	११३	१
दोधकम्	७०	२२
,,	११७	७
दोहड़िका	२७	१८
द्रुतपदम्	७७	७
द्रुतमध्या	५१	३
द्रुतविलम्बितम्	७५	४
,,	११७	२१
द्रुता	७२	२२
द्वियोधा	६२	४
,,	१११	४
धवलाङ्गः	९७	७
धीरललिता	८८	२१
धृतिः	७४	१६
,,	९२	१७

	पृष्ठे	पङ्क्तौ
नगस्वरूपिणी	६४	२१
,,	१०९	१०
नगानी	६०	२२
,,	१०९	८
नदी	८४	३
नन्दनम्	९३	११
नन्दिनी	८१	४
नराचम्	८८	२५
,,	१०९	१३
नरेन्द्रः	९९	७
नर्दटकम्	९१	८
नलिनी	८६	६
,,	११२	२२
नवमालिका	७६	१४
नवमालिनी	७६	१३
नान्दीमुखी	८४	४
नाराचः	८८	१०
नाराचकम्	९३	१४
नाराचिका	६५	३
नारी	५९	१७
,,	१०५	११
निशिपालकम्	८७	९
नीहारः	१०३	१
पङ्कावली	८२	६
पङ्क्तिः	६०	२६
,,	६७	२०
पज्झटिका	२२	८
पञ्चचामरम्	७७	११
,,	८८	१४, १५
,,	९१	१७
पञ्चचामरः	९७	१

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

	पृष्ठे	पङ्क्तौ
पञ्चचामरः (रम्)	१०९	१२,१३,१७
पञ्चालः	६०	६
,,	१११	२२
प्रणवः	६८	१
पथ्या	८४	२३
पथ्यार्या	७	१९
पथ्यावक्त्रम्	३७	१३
पदचतुरूर्ध्वम्	४५	२
पद्मम्	६	१३
परिभाषा	३	३
पविता	६६	२१
पादाकुलकम्	२२	६
पुटः	७५	२०
पुष्पदाम	९५	२४
पुष्पिताग्रा	५१	१८
,,	१२५	२०
पृथ्वी	९०	१३
,,	१२१	१७
प्रकृतिः	७४	११
,,	९८	१८
प्रचितः	१०२	८
,,	१२४	११
प्रचितकः	१०३	४
प्रतिष्ठा	६०	१३
प्रत्यापीडः	४५	९
प्रबोधिता	८०	८
प्रभद्रकम्	८५	१५
प्रभा	७६	६
प्रभावती	७९	१८
प्रमदा	८४	८
प्रमाणिका	६४	१७

	पृष्ठे	पङ्क्तौ
प्रमाणिका	१०९	१०
प्रमाणी	५७	१८
,,	१०९	६
प्रमाणीवर्गः	१०९	५
प्रमिताक्षरा	७५	१०
,,	१२०	७
प्रमुदितवदना	७६	५
प्रवरललितम्	८८	२२
प्रवृत्तकम्	१८	१४
प्रहरणकलिका(ता)	८२	२०, २१
प्रहर्षिणी	७९	१५
,,	१२१	२३
प्राच्यवृत्तिः	१८	८
प्रियंवदा	७७	२
प्रिया	५९	१९
,,	६१	३
,,	१११	२
प्रेमा	७०	२०
प्लवितकः	१०३	६
फुल्लदाम	९६	१
बन्धु	७०	२४
बाला	७०	१९
बुद्धिः	७०	२१
ब्रह्मरूपम्	८८	१६
,,	१०६	२३
भगणवर्गः	११३	१८
भद्रकम्	९९	१५
भद्रविराट्	५०	८
,,	१२५	२०
भद्रा	७०	१९
भद्रिका	६६	९

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

	पृष्ठे	पङ्क्तौ
भद्रिका	७२	८
भाराक्रान्ता	९१	१५
भुजगशिशुसृता	६६	२
भुजङ्गप्रयातम्	७५	१३
,,	११०	६
भुजङ्गविजृम्भितं	१०१	२१
भुजङ्गविलासः	१०३	२६
भुजङ्गसङ्गता	६६	१०
भ्रमरपदकम्	९५	७
भ्रमरविलसिता(तं)	७१	१५
भ्रमरावली	८६	२
,,	११२	२२
मकरन्दिका	९६	२
मञ्जरी	४५	१५
,,	८४	७
मञ्जीरम्	९३	३
मञ्जुभाषिणी	८०	७
,,	१२२	३
मञ्जुसौरभम्	५२	७
मञ्जुहासिनी	८१	३
मणिकल्पलता	८८	१
मणिगुणनिकरः	८५	१३
मणिमञ्जरी	९६	४
मणिमध्यम्	६६	६
मणिमाला	७७	३
मत्तगजगामिनी	८७	१३
मत्तमयूरम्	८०	९
,,	१२२	७
मत्तमातङ्गलीलाकरः	१०३	१२
,,	१११	१५
मत्ता	६८	१०

	पृष्ठे	पङ्क्तौ
मत्ताक्रीड़ा(ड़म्)	१००	११, १३
मत्तेभविक्रीड़ितम्	९८	९
मदनललिता	८८	२४
मदलेखा	६३	१
मदिरा	९९	१७
,,	११३	२३
मद्रकम्	९९	१४
मधु	५९	१२
,,	१०७	५
मधुमती	६३	४
मध्यक्षामा	८३	२
मध्या	५९	१५
मनोरमा	६८	१५
मनोहंसः	८५	१८
मन्थानः	६२	५
,,	११२	१
मन्दरः	६०	९
,,	१०३	१
,,	११३	१९
मन्दाकिनी	७६	५
मन्दाक्रान्ता	९०	१८
,,	१२२	२३
मयूरसारिणी	६८	८
मल्लिका	६४	१४
,,	१०८	१
महामालिका	९३	१६
महालक्ष्मीः	६६	१७
,,	१११	६
महास्रग्धरा	१००	३
मही	५९	१३
,,	१०९	७

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

	पृष्ठे	पङ्क्तौ
माकन्दः	१०३	२
माणवकाक्रीड़ितकम्	६४	२
मात्राच्छन्दः	६	११
मात्रासमकम्	२१	१०
„	१२०	११
मानसहंसः	८५	२२
माया	७०	१८
मालती	६२	६
„	७६	१६
„	११३	१३
मालतीमाला	७२	१९
„	१०६	१०
मालभारिणी	५१	१४
„	१२५	२०
माला	७०	१७
„	८५	११
मालाधरः	९१	१८
मालिनी	८४	१७
„	१२२	१९
मिश्रवर्गः	११४	९
मृगी	५९	२०
„	१११	२
मृगेन्द्रः	६०	८
„	११३	१२
मृगेन्द्रमुखम्	८०	२३
मेघविस्फूर्ज्जिता	९५	२१
मोटकम्	७७	१८
मोटनकम्	७२	९
मोदकम्	७७	१९
„	११३	२०
मौक्तिकदाम	७७	१५

	पृष्ठे	पङ्क्तौ
मौक्तिकदाम	११३	१५
मौक्तिकमाला	७२	२
यगणवर्गः	११०	१
यतिः	५	१९
यत्युपदेशोपनिषत्	५	२१
यमकम्	६१	८
„	१०७	७
यवमती	५२	२, ५
यामिनी	८७	१३
रगणवर्गः	१११	१
रणधरणी	२२	१५
रथोद्धता	७१	८
„	११७	१७
रमणः	६०	४
„	११२	१२
रामा	७०	२०
रुक्मवती	६८	४
रुचिरा	८०	४
„	१२१	२७
रूपमाली	६६	१५
„	१०६	७

रेखाप्रस्तारौ —

	पृष्ठे
अनुष्टुभ्भेदानाम्	३९
अर्द्धसमवृत्तानाम्	५३
अष्टाक्षरसमवृत्तानाम्	६५
अष्टादशाक्षरसमवृत्तानाम्	९४
आर्य्याभेदानाम्	९
उद्गतानाम्	४८
उपस्थितप्रचुपितानाम्	४९
ऊनविंशत्यक्षरसमवृत्तानाम्	९६
एकादशाक्षरसमवृत्तानाम्	७३
गीतिभेदानाम्	११

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

		पृष्ठे	पङ्क्तौ
रेखाप्रदर्शनी	गीत्यार्यादीनाम्	२८	
	चतुर्दशाक्षरसमवृत्तानाम्	८३	
	त्रयोदशाक्षरसमवृत्तानाम्	८१	
	दशाक्षरसमवृत्तानाम्	६९	
	द्वादशाक्षरसमवृत्तानाम्	७८	
	नवाक्षरसमवृत्तानाम्	६७	
	पञ्चदशाक्षरसमवृत्तानाम्	८६	
	पदचतुरूर्ध्वादीनाम्	४६	
	पारिभाषिकशब्दानाम्	५	
	मात्रासमकभेदानाम्	२३	
	वैतालीयभेदानाम्	१९	
	शिखाखञ्जयी:	५७	
	षडक्षरसमवृत्तानाम्	६२	
	षोडशाक्षरसमवृत्तानाम्	८९	
	सप्तदशाक्षरसमवृत्तानाम्	९२	
	सप्ताक्षरसमवृत्तानाम्	६३	
	लक्ष्मी:	८४	२
	लक्ष्मीधरा	७५	२२
	,,	७६	८
	,,	१११	९
	लघ्वक्षरवर्ग:	१०७	३
	लता	९३	१२
	ललना	७६	१९, २१
	ललितम्	४८	३
	,,	७६	२
	ललिता	७१	४
	लवली	४५	१५
	लालसा	९३	१३
	लालित्यम्	९९	२१
	लीला	८७	२१
	लीलाकर:	१०२	१७

	पृष्ठे	पङ्क्तौ
लीलाखेल:	८५	८
,,	१०६	१७
लीला	८४	१
लौकिकच्छन्द:	६	७
वंशपत्रपतितम्	९१	१
वंशस्थविलम्(स्था)	७४	२०, २२
,,	११९	२३
वक्त्रम्	३७	७
वरतनु:	७६	१५
वरयुवती	८७	१७
वरसुन्दरी	८२	२२
वर्द्धमानम्	४८	९
वसन्ततिलका	८२	१०
,,	१२२	१५
वसुमती	६१	२१
वाणी	६१	२०
,,	७०	१६
,,	१०५	१७
वाणिनी	८८	२
वातोर्म्मी	७१	६
वानवासिका	२१	१४
वार्त्ताहारिका	५०	१६
वासन्ती	८४	१४, १५
वाहिनी	७६	१२
विकृति:	७४	१०
,,	१०१	६
विग्गाहा	१२६	२२
वितानम्	५७	१९
,,	६५	१
विद्याधार:	७७	८
,,	१०६	१३

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

	पृष्ठे	पङ्क्तौ
विद्युत्	८०	१६
विद्युन्माला	६४	८
,,	१०६	४
विद्युल्लेखा	६१	१९
,,	१०५	१७
विध्वङ्कमाला	७२	१६
,,	११२	४
विपरीताख्यानकी	५०	१८, २०
,,	७०	१६
विपरीताख्यानिकी	५१	१
,,	७०	१८
विपिनतिलकम्	८७	८
विपुलार्या	७	२१
विपुलावक्त्रम्	३८	१
विबुधप्रिया	९३	१७
विम्बम्	९५	१८
विम्बः	६७	१
वियोगिनी	५०	४
विलासिनी	७१	२१
विश्लोकः	२१	१७
विषमवृत्तम्	३५	१३
,,	३६	४
,,	१२६	१८
विसारः	१०३	१
विस्मिता	९५	२०
वृत्तम्	३५	४
,,	९७	१८
,,	१०८	२०
वृत्ता	७१	१७
वृहती	६६	१
वेगवती	५०	५

	पृष्ठे	पङ्क्तौ
वैकुण्ठः	१०२	१९
वैतालीयम्	१७	३
,,	१२५	१
वैदिकच्छन्दःसङ्क्षेपः	१२७	१३
वैश्वदेवी	७५	१६
व्यालः	१०२	१७
शङ्खः	१०२	१८
शङ्खनारी	६२	१
,,	११०	३
शम्भुः	९७	११
शर्करी	७४	१७
,,	८२	९
शशिकला	८५	१०
शशिवदना	६१	१६
,,	९९	२
शशी	६०	२
,,	११०	२
शार्दूलं	९४	१
शार्दूलललितम्	९३	२३
शार्दूलविक्रीड़ितम्	९५	१२
,,	१२३	१७
शाला	७०	१७
शालिनी	७१	३
,,	११९	१९
शिखण्डितम्	७२	१२
शिखरिणी	९०	८
,,	१२३	५
शिखा	२६	८
,,	५६	२
शीर्षरूपम्	६३	१०
,,	१०६	१

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

	पृष्ठे	पङ्क्तौ
शुद्धविराट्	६७	२१
शुद्धविराड़्षभम्	४८	९
शुद्धा वर्गाः	१०५	४
शेषा	६१	१८
,,	१०५	१७
शैलशिखा	८७	१९
शोभा	९८	७
श्येनी	७१	१९
,,	१०८	४
श्रीः	५९	६
,,	७२	२
,,	१०५	९
श्लोकः	३८	२०
संकृतिः	७४	१०
,,	१००	२२
संग्रामः	१०२	१९
संयुक्ता	९८	२३
संस्कारः	१०३	२
संहारः	१०३	१
सगणवर्गः	११२	११
सती	९०	१७
सत्कारः	१०३	१
सन्दोहः	१०३	२
सप्तकृतयः	९७	१६
सममावकादेशः	११४	१२
समवृत्तम्	३५	११
,,	५७	१७
,,	५९	३
,,	१०५	६
समानिका	६४	१६
,,	१०८	१

	पृष्ठे	पङ्क्तौ
समानी	५७	१८
,,	६३	६
,,	१०७	२२
समानीवर्गः	१०७	१७
समुद्रतता	९६	६
सम्मोहा	६१	४
,,	१०५	१५
सरसी	९९	४
सलिलनिधिः	९९	३
साणूरम्	१०४	५
सानन्दः	१०३	२
सान्द्रपदम्	७२	४
सारः	५९	१४
,,	१०२	१९
,,	१०७	१९
सारङ्गः	७७	१२
,,	११२	६
सारङ्गिका	६६	१९
,,	८५	२
सारवती	६९	१
सिंहकम्	९९	५
सिंहनादः	८२	१
सिंहविक्रान्तः	१०३	८
सिंहविक्रीड़ः	१०३	१०
,,	११०	२५
सिंहविस्फूर्जितम्	९३	१
सिंहोन्नता (न्नता)	८२	१०, १५
सुकेसरम्	८४	१०
सुखेलकम्	८५	१७
सुधा	९५	१
सुन्दरिका	१००	१५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

	पृष्ठे	पङ्क्तौ
सुन्दरी	५०	३
,,	७५	२२
,,	१२४	१९
सुपविवम्	८४	५
सुप्रतिष्ठा	६०	२४
सुमुखी	७२	५
सुरसा	९६	८
सुरामः	१०२	१९
सुवंशा	९८	४
सुवदना	९८	१
सुवासः	६३	८
सुषमा	६९	३
सोमराजी	६२	२
,,	११०	३
सौम्या	२६	१४
सौरभकम्	४८	३
स्त्री	५९	१०
,,	१०५	१०
स्रक्	८५	१२
स्रग्धरा	९८	१९
,,	१२३	२३
स्रग्विणी	७६	७
स्रग्विणी	१११	९
स्वागता	७१	११
,,	११७	१३
हंसः	६०	२५
हंसमाला	६३	५
हंसरुतम्	६४	१२
हंसी	६८	१६
,,	७०	१७
,,	९९	२३
हरनर्त्तनम्	९३	१९
हरिः	९१	११
हरिणप्लुतम्	९३	२१
हरिणप्लुता	५१	६
हरिणवल्लभा	,,	७
हरिणी	९०	२
,,	१२३	११
हलमुखी	६६	४
हारिणी	९१	१३
हारीतः	६१	६
,,	१११	२४
हीरकम्	९५	६

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry